॥ श्रीः ॥

भाट्टभाषाप्रकाशः

श्रीनारायणतीर्थमुनिविरचितः

काशीस्थराजकीयसंस्कृतप्रधानपाठशालाध्यापक
स्वामिभागवताचार्येण संशोधितः ।

चौखम्बासंस्कृतपुस्तकालयाध्यक्ष श्रीहरिदासगुप्तेन

काश्याम्

तारायन्त्रालये श्रीमैनकम्पनीलिमिटेड्द्वारा संमुद्र्य प्रकाशितः ।

सन् १९००

वैक्रमसंवत् १९५७

श्रीः ।

भूमिका ।

आन्वीक्षिकी-त्रयी-वार्त्ता-दण्डनीतीनां चतसृणां महाविद्यानां द्वितीयस्यां स्वर्गापवर्गावायत्तेते, सा चेयमान्वीक्षिकीमन्तरेण न प्रतितिष्ठतीति प्रथमां तामुपजीवति, अन्तिमे तु द्वे दृष्टादृष्टद्वारेण त्रयीमुपजीवतः । स्वाध्यायपदवाच्यवेदवाक्यकदम्बकग्रहणादनन्तरं विचारयोगादान्वीक्षिकीति, पूजितविचाररूपत्वाच्च मीमांसेति मीमांसा न्यायविस्तर इति विद्यास्थानेषु विशिष्य परिगणितं पदवाक्यप्रमाणेषु द्वितीयमिदं मीमांसाशास्त्रमतिविततं सहस्रशो युक्तिजालजटिलम् । यस्मिन् परमपुरुषस्य स्वच्छन्दोदारा स्वीयमायाशक्तिदुर्विमर्शकार्यजातप्रसवस्वभावप्रवणाऽप्याज्ञा पदे पदेऽधिकरणेषु प्रत्यर्थिपरःशततर्कैर्भृशमायासभारं भजन्ती स्वीयतत्त्वसतत्त्वमासादयति । विविधाः खलु लोकानां मतिभेदाः प्रवृत्ताः पूर्वोत्तरमीमांसयोरैकशास्त्र्यं न वा पूर्वमीमांसाऽपि षोडशलक्षणी न वेत्यादिकया कृतमत्राधिकया कथया, यत्र तां जैमिनिमुनिकृतां जैनजनकृतां बहवः पण्डितनामानोऽपि जना मन्यन्ते । कलिसंमर्दसहस्रेषूपस्थितेषु वेदाध्ययनादेः प्रविरलभावे तदुज्जीवनकथा दुराशाऽऽवेशमात्रमुपहासास्पदम्, परं शास्त्रान्तरेषु तत्रतत्र मीमांसान्यायोपस्तम्भदानादपारिभाषिकपण्डितानां तदर्थावबोधः संक्षेपतो भवति बुभुत्सितः । तदर्थं न्यायप्रकाशादिग्रन्थोऽस्त्येव परं तत्राध्यायपादक्रमाद्यभावान्मूलशास्त्रानुसारेण तज्जिज्ञासूनां भवति कस्यापि संक्षिप्तग्रन्थस्यापेक्षा, तदर्थमयं भाट्टभाषाप्रकाशः प्रकाश्यते ।

अयं हि श्रीशिवरामतीर्थशिष्येण श्रीमता नारायणतीर्थेनोपनिबद्धोऽध्यायपादक्रमेण शास्त्रान्तरोपयुक्तैर्मीमांसार्थैर्लाघवमपेक्षमाणेन प्रायः सिद्धान्तोक्तिमात्रेण क्वचित्तु पूर्वपक्षादिकमप्यावश्यकत्वे सत्युल्लिखता ।

अयं श्री नारायणतीर्थयतिर्नूनं दाक्षिणात्यः काशीवासी नीलकण्ठशास्त्रिणः पुत्रो गोविन्दशास्त्री नाम्ना गृहस्थावस्थ एव[1] भाट्टभाषाप्रकाशमुपनिबन्धुमुपक्रम्य संन्यस्ताश्रमे पर्यापयामास। अस्य च ग्रन्थस्य नाम भट्टभाषा भाट्टभाषा भाट्टभाषाप्रकाशिका भाट्टभाषाप्रकाशश्च, अर्थस्तु सर्वत्राऽविशिष्टः प्रभाकरगुरुकुमारिलभट्टमुरारिमिश्राणामद्यत्वे पूर्वमीमांसाशास्त्रे मतानि लभ्यन्ते। तत्रापि च भाट्टप्रक्रियैव बहुमानभाजनमिति सैव भाट्टभाषा, तस्याः प्रकाश इति।

तदेतदित्थमुपयुक्तं मन्यमानेन मया पुस्तकद्वयमाश्रित्य संस्कृतम्। अत्र प्रथमपुस्तकं श्रीकाशिकराजकीयसंस्कृतपाठशालीयपुस्तकशालायाः १९३७ संवत्सरे लिखितमशुद्धिबहुलं स्थानस्थानेषु गुरुलघुभिस्त्रुटिभिर्हीनपाठमथापि प्रायः स्पष्टाक्षरम्, तदेतत् कनाम प्रथमम्। द्वितीयन्तु श्रीमन्नेपालमहाराजाधिराजगुरूणां श्रीमतां हेमराजपण्डितानां प्राचीनम्, (तत्र संवत्सरलेखस्तु न) एतच्च प्रथममष्टौ पत्त्राणि यावत् केनापि विदुषा लिखितं यद्यपि विद्वज्जातीयलिपियुक्, तथापि तत्रतत्र भ्रान्तिदाक्षरमथापि कार्यक्षमम् परं ततः परतस्तु बालविक्रीडितमात्रमेव, तदतत् ख-नाम! तृतीयं तु श्रीदामोदरलालगोस्वामिनोऽधुनैव लेखितम्। तत्प्रायः कपुस्तकानुसारि त्रुटिषु खपुस्तकानुसारीत्याभिन्नमिति स्थितमात्रमेवाऽभूदन्तिके। इत्थंचात्रावतमसे गहनप्रविष्टनेवात्मानं पुस्तकद्वययोगेन भाष्याद्यनुग्रहेण च कथंकथमपि निस्तार्य श्रीहरिदासगुप्तप्रार्थनया पारमनैषम्। तदेतत् शास्त्ररसिकानां पुरस्तादुपदीकरोमि कृतमधिकवाग्भिरिति।

ज्येष्ठारम्भपञ्चम्यां १९५७ भागवताचार्यः।
वाराणस्याम्

---

(१) क-पुस्तके हि प्रथमाध्यायान्ते पितुः स्वस्य च नाम्नोर्लेखनादिदं लभ्यते।

॥ हरिः ॐ तत्सत् ॥

अथ

भाट्टभाषाप्रकाशः ।

प्रणम्य धर्ममीशानं मीमांसां प्रविविक्षताम् ।
बालानामुपकाराय भाट्टभाषा प्रकाश्यते ॥ १ ॥
धर्मे प्रमाणान्यथ कर्मभेदः शेषप्रयुक्तिक्रमकर्तृभेदाः ।
द्वेधातिदेशस्तमनूहबाधौ तन्त्रप्रसङ्गाविति लक्षणार्थाः ॥ २ ॥

तत्र धर्मस्वरूपमुक्तम्—

फलतोपि च यत्कर्म नानर्थेनानुबध्यते ।
केवलं प्रीतिहेतुत्वात्तद्धर्म इति कथ्यते ॥ इति ।

श्येनादिव्यावृत्त्यर्थं फलत इति । तस्य हि न धर्मत्वं श्येनेनाऽभिचरन् यजेतेतिवेदबोधितत्वेपि तत्फलस्य शत्रुवधस्यानर्थहेतुत्वात् ॥

'पशुबीजादिवधजन्यदोषेण धर्मेपि स्वल्पः संकरोस्ती'ति सांख्या मन्यन्ते, तन्निरासाय केवलमिति । न हिंस्यात्सर्वा भूतानीति निषेधो हि रागतः प्राप्ताया हिंसाया अनर्थहेतुत्वं बोधयति नत्वऽग्नीषोमीयं पशुमालभेतेति विहितायाः, विधिस्पृष्टे निषेधानवकाशात्, परिहृत्यापवादमुत्सर्गाः प्रवर्तन्त इति न्यायेन निषेधशास्त्रं क्रत्वङ्गं हिंसां परिहृत्यैव प्रवर्तत इति न धर्मफले दुःखलेशसंकरोस्तीति सुष्ठूक्तं केवलमिति ॥

धर्मे प्रमाणान्यपि प्रसिद्धानि, वेदो ऽखिलो धर्ममूलं तद्विदां च स्मृतिशीले धर्मज्ञसमयः प्रमाणम् । वेदाश्च—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति ।

तथाहि । स्वाध्यायोऽध्येतव्य इति तव्यप्रत्ययेन विधिभावना प्रतीयते । भावना च भवितुर्भवनानुकूलो भावकव्यापारः सर्वेषां लकाराणामर्थः । विधिभावना तु प्रवर्त्तनात्मिका लिङ्लोट्तव्यप्रत्ययपञ्चमलकारेभ्य एवावगम्यते । सा च द्वेधा शाब्दाऽऽर्थी च । प्रत्येकं फलकरणेतिकर्त्तव्यतांशैस्त्र्यंशा । तत्र शाब्दामध्ययने प्रवृत्तिः फलम्, करणं तव्यप्रत्ययः। वेदे वक्तृभावेपि लोके ग्रामो गन्तव्य इत्यादवयं मामनेन शब्देन प्रवर्तयतीति प्रत्ययाच्छब्दस्यैव करणत्वदृष्टेः । इतिकर्त्तव्यता तु अप पुनर्मृत्युं जयतीत्यन्तार्थवादमुखेन प्राशस्त्यावगतिः । आर्थी तु किं भावयेदिति भाव्याकाङ्क्षायां कर्मोत्पन्नतव्यप्रत्ययश्रुत्या स्वाध्यायस्यैव भाव्यत्वं गम्यते ।

ननु यथा विश्वजिता यजेतेत्यत्र निष्फले प्रवृत्त्यसंभवात्स्वर्गकाम इति पदमध्याह्रियते । यथा वा ज्योतिर्गौरायुरित्यादिवाक्यविहितेषु रात्रिसंज्ञकेषु यागेषु फलाऽश्रवणे ऽपि प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्यर्थवादादेव ये प्रतिष्ठामिच्छन्ति त एता रात्रीरुपेयुरिति प्रतिष्ठारूपं फलं वाक्यविपरिणामेन कल्प्यते, एवं स्वर्गकामेन स्वाध्यायोऽध्येतव्य इत्यपमृत्युजयादिकं वाऽऽर्थवादिकं फलं कल्प्यम्, दुःखरूपस्य स्वाध्यायशब्दितस्य वेदराशेर्भाव्यत्वासंभवादिति चेन्न, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् दृष्टे संभवत्यऽदृष्टकल्पनाया अनाय्यत्वाच्च । संभवति चात्र वर्णराश्यधिगमद्वारार्थावगतिरूपं दृष्टं प्रयोजनम् ।

यथोक्तम् दृष्टो हि तस्यार्थः कर्मावबोधनमिति । अतस्तदेवात्र भाव्यम् ।

करणाकाङ्क्षायां तु अध्येतव्य इति समानपादोपात्तमध्ययनं गुरुमुखोच्चारणानूच्चारणरूपमुपतिष्ठते । इतिकर्तव्यताकाङ्क्षायां च निगमनिरुक्तव्याकरणादिकम् । तेनायमर्थः । अध्ययनेनार्थज्ञानं भावयेत् निरुक्तादिभिरुपकृत्येति । यस्त्वत्र गुरुद्वारैवार्थज्ञानं भावयेन्नात्मव्युत्पत्तिबलेनेति नियमः, न तस्य दृष्टं किंचित्फलमस्तीति तदंशे ऽस्त्वार्थवादिक्य ऽदृष्टकल्पना ।

एवं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादावपि भावनाया अंशत्रयं ज्ञेयम् । अत्रापि समानपदोपात्तमपि धात्वर्थमुपेक्ष्य काम्यमानत्वाद् व्यवहितोपि स्वर्गो भाव्यत्वेनान्वेति, धात्वर्थो यागः करणत्वेन । नहि संभवति यजेतेत्यस्य यागं कुर्यादित्यर्थे दर्शपूर्णमासाभ्यामिति तृतीयान्तेन यागनामधेयेनान्वयः । तेन दर्शपूर्णमासाभ्यां यागाभ्यां स्वर्गं भावयेत् प्राकरणिकैः प्रयाजादिभिरुपकृत्येति वाक्यार्थः संपद्यते । स्वर्गपदार्थश्च श्रुत्या दर्शितः—

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमिति ॥

नहीदृशसुखहेतावतीन्द्रिये धर्मे वेदादन्यत्प्रमाणं प्रत्यक्षं वा तदुपजीव्य ऽनुमानं वा क्रमते, तस्माद्वेद एव विधिनिषेधात्मको धर्माधर्मयोः प्रमाणम् । तौ च पदपदार्थसम्बन्धस्यौत्पत्तिकत्वेन वाक्यार्थप्रतीतेर्मूलवत्तया व्यवस्थितस्वरूपावेव ।

ननु पदतदर्थसम्बन्धस्य नित्यत्वेपि पदसमुदायरूपाणां वाक्यानां काठकादिसमाख्यावशादादिमतां कालिदासादिवाक्यानामिवाप्रामाण्यमिति चेन्न, काठकादिसमाख्यायाः कठेन प्रोक्तमिति योगेन प्रवचनपरतया वेदस्य पौरुषेयत्वासाधकत्वात् । दृढकर्तृस्मरणाभावश्च वेदस्यापौरुषेयत्वे प्रमाणम् । अनुमानं च—

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनसामान्यादधुनाध्ययनं यथेति ॥

नन्वेवमपि वेदैकदेशस्य विध्यंशस्य धर्मप्रमापकत्वेपि वायुर्वै क्षेपिष्ठा देवतेत्यादीनामर्थवादानां विधिभावनांशत्रयानन्तःपातिनां धर्माऽप्रमापकत्वाद्वेदो ऽखिल इत्यखिलग्रहणमनुपपन्नमिति चेन्न । तेषामपि प्रयोजनाकाङ्क्षिणां क्षिप्रदेवतासाध्यं कर्म क्षिप्रफलमिति लक्षणया विधिं स्तुवतां सन्निहितेन वायव्यं श्वेतमालभेतेति विध्युपदेशेन स्वविधेये पुरुषं प्रवर्त्तयितुमन्यतः स्वस्तुतिमाकाङ्क्षमाणेन (ता) नष्टाश्वदग्धरथन्यायेनैकवाक्यतया विध्यंशान्तःपातित्वात् । नन्वेवमर्थवादानां स्तुत्यर्थत्वेपि क्वचित्फलपरत्वमपि दृश्यते । औदुम्बरो यूपो भवतीति विधाय ऊर्क् पशव ऊर्गुदुम्बर ऊर्जैवास्मा ऊर्ज्जं पशूनाप्नोतीत्यस्य फलपरत्वसंभवादिति चेन्न, अतिदेशशास्त्रप्राप्तयूपानुवादेन उदुम्बरतायास्तत्फलस्य च विधाने वाक्यभेदात्सैव विधेयेति पशूनाप्नोतीत्यस्यार्थवादत्वमेव। चतुर्थे तु यस्य पर्णमयी जुहूर्भवति न स पापꣳ श्लोकꣳ शृणोति यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजा इज्यन्ते वर्म यजमानस्य भ्रातृव्याभिभूत्यै-इत्यादौ वाक्यान्तरप्राप्तस्यैव पर्णतादेः रात्रिसत्रवदार्थवादिकफलपरत्वमाशङ्क्य परार्थ्यान्नेति सिद्धान्तितम्। अन्यतः प्राप्तिश्च विधिशक्त्युपघातकयच्छब्दोपबन्धादन्तिमोदाहरणाच्च स्पष्टमेव गम्यते नैवमुदुम्बरताया इति नानयोरधिकरणयोः पौनरुक्त्यम् । शूर्पेण जुहोतीति श्रौतं शूर्पम् तेन ह्यन्नं क्रियत इत्यत्र करणेन हेतुना कल्प्यमानसाधनभावेन दर्वीपिठरादिना न विकल्पनम्, अतुल्यबलत्वात् । तस्मात्तेन हीति स्तुतिमात्रम् न तु यद्यदन्नकरणं तेन तेन होतव्यमिति हिशब्देन व्याप्तिसूचनमत्र कर्तुं शक्यम्, उक्तदोषात् । तदेवं विधिवन्निगदानां हेतुमन्निगदानां

चार्थवादानां सिद्धं प्रामाण्यं विध्येकवाक्यतया स्तुतिद्वारैव ॥

एवं तत्तत्प्रकरणपठितानां मन्त्राणामपि तत्तत्प्राकरणिकार्थप्रकाशनसामर्थ्यरूपाल्लिङ्गात्तत्तदनुष्ठेयार्थस्मारकत्वेन दृष्टेनैव द्वारेण विध्येकवाक्यता, अत्रापि पूर्ववत्परस्पराकाङ्क्षा ज्ञेया । यस्तु मन्त्रैरेवमन्त्रार्थः स्मर्त्तव्यो न ग्रहणकवाक्यादिनेति नियमो, न तदंशे किंचिद् दृष्टं प्रयोजनं लभ्यत इत्यऽदृष्टमगत्या कल्प्यते । यथा यावतो ऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति विध्युद्देशे प्रतिग्रहीतुरिष्टिः प्रतीयते । अथापि प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत स एनं वारुणं चतुष्कपालमपश्यदित्युपक्रमगतार्थवादसामर्थ्याद्दातुरिष्टिं प्रापयन्प्रतिगृह्णीयादित्यत्र प्रतिग्राहयेदिति णिच्श्रुतिमुत्थापयति, यथा वा होतुश्चित्पूर्वे हविरद्यमाशतेति मन्त्र[ः]सामर्थ्याद्वषट्कर्त्तुः प्रथमो भक्ष इति विधिमुत्थापयति ।

एवमष्टकाः कर्त्तव्या इत्यादीनि मन्वादीनां स्मरणान्यपि स्वमूलभूतां श्रुतिमनुमापयन्ति, वेदैकप्रमाणकेषु सर्वज्ञेषु तेषु भ्रमविप्रलम्भकत्वादिदोषासंभवात् । दृश्यन्ते च क्वचित्क्वचिच्छाखान्तरेपि प्रयाजाः[१] कर्त्तव्या इत्यादिस्मृतिमूलभूताः श्रुतयः (धन्विवप्रया असि त्वमग्न इत्यादयः।)[२] तत्सामान्यात्सर्वमपि स्मरणं दृष्टमूलकमेव । यथोक्तम्—

आत्मीयात्परकीयस्य दौर्बल्यं न हि किंचन ।
प्रत्यक्षत्वाविशेषेण स्वप्रत्यक्षसमं हि तत् ॥

इति न्यायेन प्रत्ययिततराणां मन्वादीनां प्रत्यक्षलिङ्गादि प्रत्यक्ष[३]तुल्यम् । अतस्तत्प्रणीता स्मृतिरपि मूलमनुमापयेदेव । अने-

(१) 'प्रयाजा' इत्येवोभय पुस्तकपाठः ।
(२) ( ) एतदन्तर्गतपाठः 'ख' पुस्तके नास्ति ।
(३) प्रत्यक्षलिङ्गादपि प्रत्यक्षेति 'क' पुस्तकपाठः ।

कासु शाखासु विप्रकीर्णानामर्थानां सुखप्रतिपत्तय एकत्र प्रणयनमर्थवद्भवतीति सिद्धं स्मृतीनां वेदमूलकत्वेन प्रामाण्यम् ॥

औदुम्बरी सर्वा वेष्टयितव्येति स्मृतिः औदुम्बरीं स्पृष्ट्वोद्गायेदित्यनया श्रुत्या विरुध्यते, सर्ववेष्टने सति स्पर्शासम्भवादप्रमाणमिति भाष्यम् । अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्येकत्राऽनुपसंहरणीयस्याप्यर्थद्वयस्य वेदे दर्शनात्सर्ववेष्टनस्मृतिमूलभूतश्रुतेरत्यन्ताभावस्यास्मदादिभिरल्पज्ञैर्निश्चेतुमशक्यत्वात् तत्सामान्यादितरेषु तथात्वमिति न्यायेनैकस्याः स्मृतेरप्रामाण्ये सर्वासामपि तथात्वापत्तेश्च नासावप्रमाणम्, किंतु यावन्मूलदर्शनं नास्ति तावदर्थानुष्ठानं न कर्त्तव्यमित्येवंपरं[1] विरोधे त्वनपेक्षं स्यादितिसूत्रमिति वार्त्तिकम् ।

हेतुदर्शनाच्चेत्यत्र वैसर्जनहोमीयं वासोऽध्वर्युः परिगृह्णातीति स्मृतेः श्रुत्यविरोधित्वेपि लोभमूलकत्वस्यैव हेतोर्दर्शनादप्रामाण्यमिति भाष्यम् । स्मृतित्वाविशेषाच्छाक्यस्मृतेरपि प्रसक्तं प्रामाण्यम् । तेषु प्रत्यक्षेण वेदविद्वेषदर्शनान्न तस्या वेदमूलकत्वं कल्पयितुं शक्यमिति वार्त्तिकम् । शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वादित्यत्र वेदं कृत्वा वेदिं करोतीतिश्रुतिशिष्टस्य क्रमस्याकोपे सति क्षुते आचामेदिति स्मृतिः प्रामाणं न तु कोपे इति चेन्न, शास्त्रपरिमाणत्वात् । आचमनं हि नैमित्तिकः पदार्थः, क्रमस्तु पदार्थधर्मः । अतः पूर्वं पदार्थः प्राप्नोति पश्चाद्धर्म इति प्रबलप्रमाणप्रापितोपि स्वतो जघन्यत्वान्नाचमनस्मृतिं बाधितुमीष्टे इति भाष्यम् ।

शाक्यशास्त्रेपि यद् वेदाऽविरुद्धमहिंसादिकं विहितम्, तत्तावत्तेऽपि ग्राह्यमिति चेन्न वेदादिना प्रमितस्यैवाऽहिंसादेर्मन्त्रस्मारितकर्मण इव फलवत्त्वं, नाऽन्येनेति शास्त्रे नियमात् । तथाचाहुः

---

(१) इत्येव परमिति ख० पाठः ।

धर्मज्ञसमयः प्रमाणं वेदाश्चेति । तस्माद्गङ्गोदकमिव श्वदृतिस्थं धर्मोपि शाक्यग्रन्थस्थस्तद्वाक्यान्नोपादेय इति वार्त्तिकम् ।

अत्रैव अपि वा कारणाग्रहणप्रयुक्तानि प्रतीयेरंस्तष्वदर्शनाद्विरोधस्येति तृतीयसूत्रे येषां वसन्तोत्सवादीनां धर्मत्वे कारणं श्रुतिः स्मृतिर्वा न दृश्यते, केवलं शिष्टैश्च धर्मबुद्ध्या यान्यनुष्ठीयन्ते, तेष्वपि शास्त्रान्तरविरोधाऽदर्शने सति प्रामाण्यं स्वध्यवसेयमित्यपि वार्तिकमेव ॥

अत्र स्मृतीनां श्रुतिकल्पनासापेक्षतया एकान्तरितं प्रामाण्यम्, शिष्टाचाराणां तु स्मृतिकल्पनापूर्वकं श्रुतिकल्पनं चेति द्व्यन्तरितम् ।

तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यादित्यत्र यवादिशब्दार्था दीर्घशूकादय एव गृह्यन्ते यत्रान्या ओषधयो म्लायन्तेऽथैते मोदमानाइवोत्तिष्ठन्तीति वाक्यशेषात् । न तु म्लेच्छप्रसिद्ध्या प्रियङ्ग्वादय इति भाष्यम् । यद्वा पील्वादिपदार्थाः किं म्लेच्छप्रसिद्ध्या गजादय उतार्यप्रसिद्ध्या वृक्षादय इति संशये आर्याणां शब्दार्थयोरविप्लवे नित्यं यतमानानां प्रसिद्धिर्बलीयसी न तु म्लेच्छानां यथाकथंचित्सांकेतिकैरपि शब्दैर्व्यवहारमात्रमिच्छताम् । यद्वा । असपिण्डामुद्वहेदित्यादिस्मृतीनां सन्निबन्धानां मातुलदुहितृपरिणयनाद्याचारेभ्यो र्निनिबन्धनेभ्यो लोभमूलकेभ्यः प्राबल्यमत्र निर्णीयते । वस्तुतस्तु मातुलदुहितृपरिणयनं न विगीतम् तृप्तां जहुर्मातुलस्येव योषा, भागस्ते पैतृष्वसेयीव यामिवेति(?)मन्त्रलिङ्गावगतत्वात् प्रद्युम्नाद्यैः शिष्टैरादृतत्वाच्च किं तु देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभागिति स्मृतेरग्नीषोमीयालम्भस्य कलौ दुर्लभत्वात्पलपैतृकस्य च निषेधात्तदुभयं विना क्रियमाणं मांसभक्षणं दोषहेतुः, अतस्तदेवात्रोदाहरणमिति दाक्षिणात्याः, जहुरपत्यम्

(असपिण्डामिति शास्त्रं तु नातिरात्र इतिवन्मतान्तराभिप्रायम्)[१] यद्वा त्रिवृदादिपदार्थो वाक्यशेषात्स्तोत्रीयानवकादिकमेव न तु लोकप्रसिद्ध्या त्रिवृद्रज्ज्वादिकमिति वर्णकत्रयं वार्तिके।

पिकादिपदानामर्थो म्लेच्छप्रसिद्ध्यापि शुकादिर्ग्राह्यः, तस्यार्याणां क्वचिदप्यप्रसिद्धेर्विरोधाभावात्। कल्पसूत्राणां प्रत्यक्षश्रुतिसरूपत्वेपि न वेदत्वं किं तु दृढकर्तृस्मरणात्पौरुषेयत्वमिति भाष्यम्। यद् ब्राह्मणानीतिहासान्पुराणानि कल्पानिति नित्ये ब्रह्मयज्ञे ब्राह्मणवदितिहासादीनां विनियोगान्नित्यानित्ययोः संयोगायोगादेतान्यपि नित्यानि स्वातन्त्र्येण वेदवत्प्रामाण्यमेषाम्। एवं मन्त्रब्राह्मणयोर्वेदनामधेयम् षडङ्गमेके-इति मन्त्रवत् शिक्षादीनां वेदत्वस्मरणात्स्वातन्त्र्यमिति पूर्वः पक्षः। दृढकर्तृस्मरणादेव तेषामपि पौरुषेयत्वात्स्मृतिवद्वेदमूलकत्वेनैव प्रामाण्यं, न स्वातन्त्र्येण। नित्यकर्मयोगस्त्वेषां प्रतिकल्पं वर्णानुपूर्वीभेदेपि जातिशब्दवदर्थानां नित्यत्वाज्ज्ञेयः। षडङ्गमेक इति पूर्वपक्षोपन्यासो, न तु सिद्धान्तः, दृढकर्तृस्मरणादेवेति वार्तिकम्। मानवादिस्मरणानां होलाकाद्याचाराणां चाध्येतृविशेषेषु देशविदेशेषु च परिग्रहो दृश्यमानोपि नासौ श्रुतिमूलकः, तादृशश्रुतिकल्पने प्रमाणाभावात्। तस्मादेषां व्यवस्था नास्ति परंपरया यथाप्राप्तं तथानुष्ठेयमित्यर्थः।

व्याकरणस्मृतिप्रामाण्याद्गवाद्या एव साधवो न गावीगोणीगोतागोपोतलिकेत्यादयस्तेषामशक्तिजापभ्रंशरूपत्वात् प्रयोगचोदनाभावात्, अर्थैकत्वमविभागादित्यत्र एवं वेदे शब्दः प्रयोक्तव्यः एवं लोक इति विशेषशास्त्राभावाल्लोकवेदयोः पदैकत्वं च। य एव लौकिकाः शब्दास्त एव वैदिकास्त एव चामीषामर्था इति स्थितम्। तत्र—

---

(१) ()एतच्छृङ्खलान्तर्गतः 'शिष्टेरादृतत्वाच्च' त्यतः परं कपुस्तकेऽस्ति।

पदावधारणोपायान्बहूनिच्छन्ति सूरयः।

क्रमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीरिति वचनात्

यत्र जराराजादौ क्रमान्यत्वम्, तत्र तदवशादर्थभेदः। तथा ब्रह्मब्राह्मणादौ न्यूनातिरिक्तवर्णवशात्।इन्द्रशत्रुरित्यादौ आद्युदात्तत्वे इन्द्रः शातयितास्येत्यर्थः, अन्तोदात्तत्व इन्द्रस्य शातयितेति स्वरभेदात्। गच्छत इत्यस्य पदस्य देवदत्तयज्ञदत्तौ देवदत्तस्य चैत्रमैत्रदेवदत्तानिति पदान्तरसमभिहारे सति तिङन्तद्विवचनत्वं सुबन्ते षष्ठ्येकवचनान्तत्वं द्वितीयाबहुवचनान्तत्वं वा भवति। यत्राहीयत तदहीनस्याऽहीनत्वम् अह्नः खः क्रतौविति श्रुतिस्मृती तु अहीनपदस्यार्थभेदके (दिके) न हीनो अहीनः अह्नां समूहोऽहीन इति। देवासः त्मनेत्यादौ क्वचित्पदभेदेपि अभेद एव एकदेशन्यूनाधिकत्वेपि तदेवेदं पदमिति प्रत्यभिज्ञानादभेदज्ञापकानुशासनाच्च। अतः सिद्धो लोकवेदयोः पदानां तदर्थानां चाभेदः॥ शब्दार्थस्त्वाकृतिरेव व्यक्तेर्लक्षणयाऽऽक्षेपसम्भवान्न वाच्यकोटावनुप्रवेशः। एवं विधीनां स्वातन्त्र्येणार्थवादमन्त्रयोस्तत्स्तुतिस्मृत्यर्थत्वेन स्मृतीनां तन्मूलत्वेन च प्रामाण्यं दर्शितम्॥ ३॥

(इति तृतीयः पादः॥)

उद्भिदा यजेतेत्यादावुद्भिदादिपदानामपि वेदावयवत्वात्प्रसक्तं प्रामाण्यम्। तत्किं गुणविधित्वेन यागनामधेयत्वेन वेति चिन्त्यते। तत्राद्ये उद्भिदा यजेत बलभिदा यजेतेत्यादावुद्भिद्वता यागेनेष्टं भावयेदिति मत्वर्थलक्षणादोपान्नामधेयत्वम्। सोमेन यजेतेत्यादौ तु सोमशब्दस्य लतायां रूढत्वात् यागनामत्वासम्भवेनाऽगत्या सोमवतेति लक्षणाश्रयणम्। अत्र तूद्भिदादिपदार्थस्य लोकाप्रसिद्धत्वान्न तद्युक्तम्। तथा दधि मधु घृतं पयो धाना उदकम् तण्डुलास्तत्संसृष्टं प्राजापत्यमिति प्रकृत्य चित्रया यजेत पशुकाम इति प्राप्तकर्मानुवादेन चित्रत्वस्त्रीत्वलक्षणगुणद्वयविधाने

वाक्यभेदात्। नामधेयत्वे तु प्रकृतयाग एव फलान्वयान्न कश्चि-द्दोष इति चित्रापदमपि यागनामधेयम्। अग्निहोत्रं जुहुयादित्यत्र अग्नये होत्रं यस्मिन्निति व्युत्पत्त्या ऽग्निरूपगुणविधानम् वाक्यात्, धात्वर्थविधानं तु सन्निहिततरम्। न चा ऽत्राग्निपदमनन्यगतिकम्, उक्तव्युत्पत्त्यैव तस्य धात्वर्थनामावयवत्वसम्भवात्। अग्निर्ज्योति-र्ज्योतिरग्निः स्वाहेति मन्त्रलिङ्गं विधित्सितस्य गुणस्य प्रख्यापकम-न्यच्छास्त्रमस्ति। अतोऽग्निहोत्रपदमपि कर्मनामधेयम्। श्येनेनाभिचर-न्यजेतेत्यत्रापि यथा ह[१] वै श्येनो निपत्यादत्त एवमयन्द्विषन्तम्भ्रातृ-व्यन्निपत्यादत्त इति श्येनवद्व्यपदेशाच्छ्येनपदमन्यत्ररूढमपि याग-नामधेयमेव, न गुणविधिपरम्। वाजपेयेन स्वाराज्यकामो यजेते-त्यत्रोक्तनिमित्तचतुष्टयाभावेपि वाजं सुराद्रव्यं पेयमस्मिन्निति न गुणविधानं, विरुद्धत्रिकद्वयापत्तेर्वाक्यभेदावश्यम्भावेन तत्र सम्ब-न्धायोगात् नहि सकृदुच्चरितः प्रत्ययो धात्वर्थस्य युगपत्फलेन वाजेन च सम्बन्धङ्कर्त्तुमीष्टे। तथा हि वाजेन यागं यागेन स्वारा-ज्यमित्यन्वये यागस्य फलं प्रति विधेयत्वम् उपादेयत्वङ्गुणत्व-ञ्च वाजगुणं प्रति अनुवाद्यत्वं उद्देश्यत्वम्प्रधानत्वञ्च. तत्र विधेयत्वादित्रयं ज्ञाप्यमनुष्ठेयं शेषभूतञ्च। अनुवाद्यत्वादि-त्रयं ज्ञातमननुष्ठेयं शेषिभूतञ्चेति नैकस्मिन् ज्ञाप्यत्वज्ञातत्वादि-के सम्भवतः, मिथोविरुद्धत्वात्। पूर्वेष्वप्यऽयन्दोषोनुगतो ज्ञेयः। तमभ्युपेत्यैवाधिकदोषविवक्षयात्र विचारः प्रवर्तितः।[२] तस्मान्नाम-धेयं वाजपेयपदमिति सिद्धम्। यद्यप्येवंजातीयकेषु वाक्यभेदो दोषस्तथापि यत्रापूर्वं कर्म विधीयते तत्रानेकगुणविशिष्टमपि तद्विधीयते। विशिष्टस्यैकत्वाच्च न वाक्यभेदो दोषावहः। यथोक्तम्—

(१) खपु० हृति नास्ति।

(२) अनुगतः। तमभ्युपेत्यैव विचारः प्रवर्त्तितो ज्ञेय इति ख०।

प्राप्ते कर्माणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः॥ इति।

यथा यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पूर्णिमाया[१]ञ्चाच्युतो भवतीति ताव ऽब्रूतामग्नीषोमावाज्यस्य नावुपांशु पौर्णिमास्यां यजन् ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत् ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामित्यादौ युगपद्द्रव्यदेवताकालोपांशुत्वादिगुणविशिष्टकर्मविधानेपि न दोषः। बर्हिराज्ययूपाहवनीयादिशब्दा वैदिकप्रसिद्ध्या संस्कारनिमित्ता अपि व्रीह्यादिवज्जातिशब्दा एव प्रोक्षणीनिर्मन्थ्यशब्दौ तु योगरूढावेव। चातुर्मास्येषु आग्नेयमष्टाकपालं निर्वपेत्सौम्यं चरुं सावित्रं द्वादशकपालं[२] सौम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालमित्यस्य सन्निधौ श्रूयते वैश्वदेवेन यजेतेति। तत्र वैश्वदेवपदं छत्रिन्यायेनाष्टानां यागानां नामधेयमिति।[३] यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमिति योगादष्टाना[४]मप्येतन्नामधेयम्। एषां च नाम्नां वैश्वदेवेन यक्ष्य इत्येवमादिव्यवहारसिद्धावुपयोगः। एवं वरुणप्रघाससाकमेधशुनासीरशब्दा अपि समुदायानामेवानुवादकाः वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यत् त्रिकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद् द्वादशकपालो जगत्यैवास्मिन्पशून्दधाति यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव ते-

(१) अमावास्यायां पूर्णमास्यां चेति ख०।
(२) निर्वपेदित्यधिकं क०।
(३) तथेत्यधिकं ख०।
(४) अष्टाकपालाना मिति क०।

जस्वयऽन्नाद इन्द्रियावी पशुमान्भवतीति। अत्र जातपदोपेतोपक्रमोपसंहारैकरूप्यादेकवाक्यत्वावगतेरुत्पत्तिशिष्टगुणावरुद्धे उत्पन्नशिष्टस्य निवेशायोगादष्टाकपालादिवाक्यं न कर्मान्तरविधिर्न वा पूर्वस्मिन्नेव कर्मणि गुणान्तरविधिः, किन्तु द्वादशकपालस्यैवावयवद्वारा स्तुतिः। कर्मवत्कर्माङ्गान्यपि केनचित्सामान्येन स्तूयन्ते इत्याह। तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायादिति। यजमानः प्रस्तर इत्यत्र यजमानकार्यकारित्वात्प्रस्तरे यजमानशब्दः। अग्निर्ब्राह्मण इत्यादौ ब्राह्मणेऽग्निशब्दस्तेन सहैकयोनित्वात् मुखादग्निरजायत ब्राह्मणोऽस्य मुखमासीदिति लिङ्गात्। आदित्यो यूप इत्यादावूर्द्ध्वत्वसारूप्यादञ्जनदेशे[1] भास्वरत्वसारूप्याद्वा यूपे आदित्यशब्दः। अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वा इत्यत्र गोश्वव्यतिरिक्तेष्वजादिष्वऽपशुत्वोक्तिर्गवादेः प्राशस्त्यदर्शनार्था। सृष्टीरुपदधातीत्यादौ सृष्टिसंज्ञकानामिष्टकानां बहुत्वात्सृष्ट्यसृष्टिसमुदाये सृष्टिशब्दो भूमगुणयोगात्। प्राणभृत उपदधातीत्यत्र तु अप्राणभृत्संज्ञकानामिष्टकानां बहुत्वेपि च्छत्रिणो गच्छन्तीतिवल्लिङ्गसमवायमात्रेण प्राणभृदप्राणभृत्समुदाये प्राणभृच्छब्दः। संदिग्धेषु[2] वाक्यशेषात्। अक्ताः शर्करा उपदधातीत्यत्राञ्जनसाधनद्रव्यसंदेहे तेजो वै घृतमिति वाक्यशेषात् घृतेनाक्ताः शर्कराः कर्तव्या इति निर्णयोपि द्रव्यस्तुतिप्रयोजनम्। अर्थाद्वा कल्पनैकदेशत्वात्। यत्र निर्णायकोर्थवादोपिनास्ति तत्राख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीतिन्यायेन यथा प्रासादे भुङ्क्ते कांस्ये भुङ्क्त इत्यत्र प्रासाद उपविश्य कांस्ये परिविष्येत्यर्थात् प्रतीयते, न तु विपरीतम्। एव

---

(१) देशेनामदाने।

(२) अत्र खपु० च-इत्यधिकम्।

स्रुवेणावद्यतीतिविधिः सामर्थ्याद् द्रवद्रव्यविषये, स्वधितिनावद्यतीति मांसविषये, हस्तेनावद्यतीति च पुरोडाशविषये व्यवतिष्ठते॥४॥

(इति चतुर्थः पादः ।)

इति नीलकण्ठसूरिसूनुगोविन्दविरचिते भाट्टभाषाप्रकाशे प्रथमो ऽध्यायः ॥ १ ॥

भावार्थाः कर्मशब्दा इति । विध्यर्थवादमन्त्रनामधेयस्मृत्याचाराख्यानि धर्मे प्रमाणानि षण् निरूपितानि, इदानीं तत्स्वरूपभेदः शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरैः षड्भिः प्रमाणैः प्रतिपाद्यते । तस्य चोत्पत्तिश्चोदनावाक्यगतेभ्यः सर्वेभ्यः पदेभ्य इति न, गौरवात् किंतु लाघवादितरविशेषितादेकस्मादेव पदात्। तत्रापि क्रियापदादेव, तस्या एव फलसिद्धौ प्रधानत्वात् नतूपपदात्। अन्यथा सोमेन यजेतेत्यादौ श्रुतद्रव्यापचारे पूतीकादिः प्रतिनिधिर्न स्यात् । गुणे ह्यऽन्याय्यकल्पना सम्भवति, न प्रधाने। अतो धात्वर्थादेव धर्मोत्पत्तिः । स च देवतोद्देशेन द्रव्यत्यागात्मकमानसक्रियात्वाद्यद्यप्याशुतरविनाशी, तथापि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेतिश्रुतार्थापत्त्या यागावान्तरव्यापाररूपापूर्वनाम कालान्तरभोग्यफलप्रातिभूत्वेन कल्प्यते, भोक्ता च देहादन्यस्तत एव सिद्ध्यति। अपूर्वाणि तु अमावास्यायोगिभ्यस्त्रिभ्यः प्रधानेभ्यस्त्रीणि प्रथममुत्पद्य पश्चात्समुदायापूर्वमारभन्ते । एवं पौर्णमासेऽपि अपूर्वत्रयादेकं समुदायापूर्वम्। ताभ्यां पुनः परमापूर्वं जन्यते । अङ्गापूर्वाणि तत्रैवोपकुर्वन्तीति। तत्राप्यवघातादीनां दृष्टार्थानां नियमांशेनैवापूर्वोत्पादकत्वम्। प्रोक्षणादीनां तु दृष्टार्थत्वाभावात्केवलमपूर्वार्थत्वमेव । एवं स्तोत्रशस्त्रयोरपि । तत्र ह्याज्यैः स्तुवते प्रउगं शंसतीति श्रुत्या स्तवनस्यैव कर्तव्यताप्रतीतेर्याज्यादिना तयोर्देवता-

स्मरणादिदृष्टकार्यार्थत्वायोगात्। प्रगीतमन्त्रसाध्यं स्तवनं स्तोत्र, मप्रगीतमन्त्रसाध्यं तदेव शस्त्रम्। एवं ब्राह्मणस्थमेवाख्यातं प्रधानकर्म वा गुणकर्म वा विधत्ते न तु देवांश्च याभिर्यजते ददाति चेत्यादिमन्त्रस्थम्। प्रयोगाङ्गानां मन्त्राणां प्रयोगबहिर्भूते विधावसामर्थ्यात्[1]। यत्राभियुक्तानां मन्त्रप्रसिद्धिस्ते मन्त्राः। अन्यद्ब्राह्मणम्। तत्रापि ऊहप्रवरनामधेयानां न मन्त्रत्वम्, प्रसिद्ध्यभावादेव। ऋग्यजुःसामानि प्रसिद्धान्येव। पादबन्धवत्यृक्। अनियताक्षरपादं यजुः। गीतिः सामेति। प्रोक्षणीरासादयेत्यादयो निगदाः पादबन्धप्रगीतमन्त्रत्वाभावेन ऋक्साम(मा)भ्यामन्यत्वाद्यजुःष्वेवान्तर्भवन्ति। यजुःप्रमाणं तु यावत्साकाङ्क्षमेकार्थं पदजातं तावदेव। यथा स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामीति सदनकरणार्थमेकं यजुः। तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति पुरोडाशासादनार्थमपरं यजुः। अन्यथा यजुश्छेदे[2] उभयोरपि वाक्ययोरसंगतार्थता स्यादिति निश्चीयते। इषे त्वेत्यादावाकाङ्क्षानिवर्त्तकपदं यद्यपि नास्ति तथापि इषे त्वेति शाखां छिनत्त्यूर्जे त्वेत्यनुमार्ष्टीतिविनियोगबलान्मन्त्रभेदश्छिनद्मीत्याद्यध्याहारेण वाक्यपूरणं च। या ते अग्ने ऽथ याशया तनूर्वर्षिष्ठा गह्वरेष्ठो उग्रं वचो अपावधीत् त्वेषंवचोअपावधीत्स्वाहेति संपूर्णार्थमन्त्रमाम्नाय श्रूयते या ते अग्ने रजाशयेति, या त अग्ने हराशयेति। अनयोः साकाङ्क्षयोराकाङ्क्षापूरणं तनूरित्यादिना भवितुं युक्तमिति तदेवानुषञ्जनीयम्। अश्रुतकल्पनापेक्षया सन्निहितश्रुतानुषङ्गस्य लघुत्वात्। चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनात्वित्यनयोर्निराकाङ्क्षयोरपि देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेणे-

(१) विधानसामर्थ्यादिति ख०।

(२) यजुश्छन्दे इत्युभयपुस्तकपाठः। तत्र छन्दपदार्थः स्वाच्छन्द्यं स्यात्।

त्युत्तरमन्त्रगतो वाक्यशेषोऽच्छिद्रेणेत्यादिः योग्यतया सम्बन्धुर्महतीति तत्राप्यनुषञ्जनीयः। असम्बद्धपदव्यवधाने तु नानुषङ्गः सं ते वायुर्वातेन गच्छतां सं यजत्रैरङ्गानि सं यज्ञपतिराशिषेत्यादौ गच्छतामित्येकवचनस्याङ्गानीति बहुवचनेन सम्बन्धानर्हत्वात् तद्व्यवायाच्चाशिषेत्यत्रापि नानुषङ्गः सध्यतामिति तदेवमुपाद्घातं तत्प्रसक्तानुप्रसक्तं च समाप्य लक्षणार्थभेदमुदाहरति ॥१॥

(इति द्वितीयाध्यायस्य प्रथमः पादः)

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्। यजति ददाति जुहोतीत्यादौ धात्वर्थभेदात्कर्मभेदः। समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्यादावेकस्यैवाख्यातस्याऽसकृच्छ्रवणरूपादभ्यासात्कर्मभेदः, न तु समिदादिगुणात्। तस्य समिधो अग्न आज्यस्य व्यन्त्वित्यादिमन्त्रलिङ्गप्राप्तत्वात्। अप्राप्तो हि गुणः पूर्वत्र निवेशमऽलभमानो गुणिनं भिनत्ति। न तु प्राप्तस्ततो यजतिशब्दस्याभ्यास एवात्र कर्मभेदकः पूर्वोदाहृतानि यदाग्नेयोऽष्टाकपाल इत्यादीनि समिध इत्यादीनि वाक्यानि पठित्वाम्नायते य एवं विद्वानमावास्यां यजते य एवं विद्वान्पौर्णमासीं यजत इति। अत्र न कर्म विधीयते तत्स्वरूपस्य द्रव्यदेवतस्याभावात्। किं तर्हि अमावास्यापौर्णमासीशब्दाभ्यां तत्तत्कालविहितौ समुदायावनूद्येते। अनुवादप्रयोजनं तु अमावास्यायाममावस्यया यजेत पौर्णमास्यां पौर्णमास्या दर्शपूर्णमासाभ्यां[१] स्वर्गकामो यजेतेत्यादि।

अत्र विधिश्चतुर्विधः। उत्पत्त्यधिकारविनियोगप्रयोगभेदात्। तत्र कर्मस्वरूपमात्रावगमको विधिरुत्पत्तिविधिः, यदाग्नेयोऽष्टाकपाल इत्यादिः। फलसंबन्धबोधको विधिरधिकारविधिः चित्रया यजेत पशुकामः सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ सर्वेभ्योऽग्निष्टोम

(१) पौर्णमासीति क०।

इत्यादिः । व्रीहिभिर्यजेत यवैर्यजेत यवैर्यजति समिधो यजति तनूनपातं यजतीत्यादिरङ्गसंबन्धबोधको विधिर्विनियोगविधिः । अत्र व्रीहियवादीनां दृष्टार्थानां विकल्पः, समित्तनूनपादादीनामदृष्टार्थानां समुच्चयः । यद्यपि विकल्पे ऽष्टौ दोषा, स्तथापि वाक्यद्वयस्य समबलत्वादन्यतरेणेतरबाधायोगादगत्याङ्गीक्रियते । ते च व्रीह्युपादाने व्रीह्यंशे स्वीकृताप्रामाण्यत्यागः, अस्वीकृतस्य प्रामाण्यग्रहः, यवांशे स्वीकृतप्रामाण्यत्यागः अस्वीकृताप्रामाण्यग्रहः । एवं यवोपादानेपि । साङ्गप्रधानानुष्ठापको विधिः प्रयोगविधिः स च क्वचित्क्वचित् कल्प्यते औपदेशकैरातिदेशिकैश्चाङ्गैः समवेतं चित्राख्यं यागं कुर्यादिति । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत योऽग्निष्टोमेन स्वर्गकामो यजेतेत्यादिस्तु स्वर्गकामपदं सर्वेभ्य इतिप्राप्तस्याऽवद्युत्यानुवाद इति पक्षमाश्रित्य श्रौतः ।

स पुनस्त्रिविधः अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्च । तत्र यो मानान्तरेणात्यन्ताप्राप्तस्यार्थस्य विधायकः स आद्यः यथा व्रीहीन्प्रोक्षतीति । नह्येनं विना प्रोक्षणं व्रीहिषु कथंचिदपि प्राप्नोति । लोकाद्वेदतो वा यत् पक्षप्राप्तं तस्याप्राप्तांशपरिपूरणफलो द्वितीयः यथा व्रीहीनवहन्तीति । यथा वाग्रयणे व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेताऽयवेभ्यः यवैरिष्ट्वा यवैरेव यजेताव्रीहिभ्य इति । आद्ये तण्डुलानिष्पत्त्याक्षेपादवघातवन्नखविलनस्यापि लोकावगतकारणत्वाविशेषात् प्राप्तौ अवघाता ऽप्राप्तांशोस्ति । द्वितीये पूर्वोदाहृतव्रीहियववाक्याभ्यां व्रीह्याग्रयणादूर्द्ध्वमपि पक्षे यवप्राप्त्या व्रीह्यप्राप्तांशोस्ति, तत्परिपूरणे त्वितरनिवृत्तिरर्थाद्भवतीति व्रीहिभिरेवेत्येवकारोनुवादः । वदतो लोकतो वा समुच्चित्यप्राप्तयोरितरनिवृत्तिफलको विधिस्तृतीयः यथा इमामगृभ्णान् रशनामृतस्येत्यश्वाभिधानीमादत्त इति पञ्च

पञ्चनखा भक्ष्या इति च। अग्निचयने इष्टकानयना[१]र्थमश्वरशना-ग्रहणं गर्दभरशनाग्रहणं चेति द्वयमनुष्ठेयम्, तत्रोभयत्रायं मन्त्रो र-शनाग्रहणप्रकाशनसामर्थ्यरूपाल्लिङ्गादेव प्राप्त इति नाऽश्व-रशनाग्रहणाङ्गत्वं प्रतीयतेऽपि तु गर्दभरशनातो व्यावृत्तिरेवा-ऽगत्या दोषत्रयं सोढ्वाप्यङ्गीक्रियते विधिवैयर्थ्यपरीहाराय। दोष-त्रयं च श्रुतस्याश्वरशनाग्रहणाङ्गत्वस्य त्यागः, अश्रुतस्य गर्दभर-शनाङ्गत्ववर्जनस्य ग्रहणं, मन्त्रलिङ्गात्सामान्यतः प्राप्तस्य गर्दभर-शनाङ्गत्वस्य त्याग इति श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति सर्वत्र परिसंख्यायां दोषत्रयं ज्ञेयम् ॥

एवंभूतैर्विधिभिर्विहितं कर्म द्विविधं गुणकर्मार्थकर्मभेदा-त्। तत्र यत् क्रतुकारकमाश्रित्य विधीयते तदाद्यम्, उत्पत्त्या-प्तिविकृतिसंस्कृतिरूपफलभेदाच्च चतुर्विधम्। वसन्तेऽग्नीनादधीत यूपं तक्षति। अत्राधानतक्षणादिसंस्काराभ्यामग्नियूपयोः प्रा-गसतोरुत्पत्तिः फलम्। एवं पिष्टानि संयौतीत्यत्र संयवनस्य पिण्डोत्पत्तिः। स्वाध्यायोऽध्येतव्यः गां दोग्धीत्यादावध्ययन-दोहनाभ्यां सिद्धयोरेव स्वाध्यायपयसोः प्राप्तिः। सोममभिषु-णोति व्रीहीनवहन्ति दक्षिणाग्नावाज्यं विलापयतीत्यादौ क-ण्डनादेः सोमादिपूर्वरूपपरित्यागेन रूपान्तरापत्तिर्विकृतिः। च-तुरो मुष्टीन्निर्वपति व्रीहीन्प्रोक्षतीत्यादौ निर्वापप्रोक्षणाभ्या-मपूर्वीयेषु व्रीहिषु अदृष्टरूपं गुणाधानं दोषापकर्षणं वा संस्का-राख्यं क्रियते तस्य फलं तेषु योग्यत्वसिद्धिः। दृष्टरूपोऽपि सं-स्कारः पुरोडाशानलं करोति तण्डुलांस्त्रिः प्रक्षालयतीत्यादिः। क्रतुकारकमनाश्रित्य यद्विधीयते तदर्थकर्म।

---

(१) चयनार्थमिति खपु०।

तच्च द्विविधम् अन्यार्थमङ्गमनन्यार्थं प्रधानं च । अङ्गमपि द्विविधं सन्निपत्त्योपकारकमाऽऽरादुपकारकं च । तत्र प्रधाने क्रतुरूपे [यत्] स्वरूपेणोपकारकं तदाद्यम् यथा व्रीह्यादि। यत्क्रत्वपूर्व उपकरोति तद् द्वितीयम् यथा प्रयाजादि। अनन्यार्थमपि द्विविधम् प्रकृतिरूपं विकृतिरूपं च। तयोर्यत्सन्निधौ सर्वाण्यङ्गानि विधीयन्ते तत्प्रथमम् दर्शपूर्णमासज्योतिष्टोमादि । यदङ्गं विकलं विधीयते तद् द्वितीयं सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः विश्वजिता येजेतेत्यादि। तत्र प्रथमे कथंभावपूरणं तस्य संनिधौ पठितैरेवाङ्गैर्भवति। द्वितीये तु प्रकृतिवद्विकृतिः कर्त्तव्येति कल्पितेनातिदेशवाक्येनेति [वि] शेषः। अग्निहोत्रादीनि तु दर्वीहोमाख्यानि प्रधानकर्माणि न तानि कस्यचित्प्रकृतिर्विकृतिर्वा भवन्ति किंत्वऽपूर्वाण्येव। तान्यपि कर्माणि त्रिविधानि नित्यनैमित्तिककाम्यभेदात्। यावज्जीवादिचोदनाचोदितं नित्यम्। यावज्जीवमग्निहोत्रं जुहुयात् यावज्जीवं दर्शपूर्णमासाभ्यां यजेत वसन्ते वसन्ते ज्योतिषा यजेत, ज्योतिषा ज्योतिष्टोमेन, अहरहः संध्यामुपासीत तानेतान्यज्ञानहरहः कुर्वीतेत्यादि । निमित्तानन्तरं कर्त्तव्यं नैमितिकम् वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इत्यादि । प्रायश्चित्तमप्यत्रैवान्तर्भवति। तच्च द्विविधं क्रतुभ्रेषनिमित्तं पुरुषभ्रेषनिमित्तं च। आद्यमऽग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां पौर्णमासीं वातिपातयेदित्यादि । यो ब्रह्मचारी अवकिरेत्स नैर्ऋतं गर्दभमालभेतेत्यादि द्वितीयमित्यलं प्रसक्तानुप्रसक्तोक्त्या, प्रकृतमनुसरामः ।

यथा य एवमितिविद्वद्वाक्ये पौर्णमासीपदेनाग्नेयादित्रिकस्यानुवाद एवमुपांशुयाजमन्तरा यजतीत्युपांशुयाजपदेन विष्णुरुपांशु यष्टव्यो ऽजामित्वायेत्यादिवाक्यविहितविष्ण्वादित्रिक-

स्यानुवादोस्त्विति न युक्तम्, जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावित्युपक्रान्तजामितादोषपरिहार एकेनापि भवति जामि वा इत्यजामित्वायेति च श्रूयमाणोपक्रमोपसंहारैक्यरूपा वा तस्यैकवाक्यत्वस्य यात्रय[1]कल्पनया भङ्क्तुमयुक्तत्वात्। ननु द्रव्यदेवतं यागस्वरूपमत्र वाक्ये नास्ति यष्टव्यवाक्ये तु देवतामात्रमस्तीति अत्रैव यागोत्पत्तिरिष्टेति चेन्न। सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमिति ध्रौवाज्यलाभस्योभयत्रापि तुल्यत्वात्। आग्नेयाग्नीषोमीययाज्यानुवाक्यायुगलयोरन्तराले पठिताद्याज्यानुवाक्यायुगलाच्च देवतालाभ इति न किंचिद् दुःस्थम्। यष्टव्यवाक्यं तु स्तुतिमात्रम् ईदृशोयमुपांशुयाजो यत्र विष्णुरिज्यते इति तत्र विष्णुनाग्नीषोमौ प्रजापतिश्च विकल्पते। एवमन्यत्रापि कर्मभेदार्थः पूर्वः पक्षः, तदभेदार्थः सिद्धान्त इति ज्ञेयम्। तिस्र आहुतीर्जुहोतीत्यत्र बहुत्वात्संख्यायाः स्पष्ट[ः]कर्मभेद इति सप्तदश प्राजापत्यान्पशूनालभत इत्येवोदाहरणे प्रजापतिर्देवता येषामिति विग्रहे सप्तदशपशुद्रव्यको यागः। प्राजापत्यश्च प्राजापत्यश्चेति श्रुततद्धितान्तानामेकशेषे प्रतिपशु प्राजापत्यत्वपर्यवसानात्सप्तदश यागाः, प्रकृतौ त्वेकः। पशुनिष्पन्नैकादशावदानद्रव्यत्वं यागस्य दृष्टम्, तत्सामान्यादतिदेशादिहापि प्राप्तं न प्रत्याख्यातुं शक्यम्। अतः सप्तदशैव यागाः। फलं तु पूर्वपक्षे एकपशुनाशे गणनाशः। सिद्धान्ते तन्मात्रस्यैव नाश इति तस्यैव पुनरुपादानं नान्यस्येति। प्रदानं तु देशकालकर्त्रैक्यात् सर्वेषां सहैव दधिपयसोरपि प्रकृतौ। एवमेव ज्योतिष्टोमं प्रकृत्य अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यादौ न पूर्व-

---

(१) ऐकरूप्येण तस्यैकवाक्यत्वस्य यागत्रयेति संभाव्यते पाठः, कपुस्तकस्यात्र द्वितीयाध्यायपर्यन्तं खण्डितत्वात्।

त्रैव सहस्रदक्षिणागुणविधिः । ज्योतिरादिपदानामानर्थक्यापातात् संज्ञाश्रुत्यार्थान्तरावश्यम्भावेन प्रकरणविच्छेदावश्यंभावाच्च ज्योतिरादिसंज्ञानि कर्मान्तराण्येवैतानि । वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति वैश्वदेवयागे उत्पत्तौ आमिक्षया ऽवरुद्धे उत्पन्नशिष्टं वाजिनं निवेशमलभमानं ततोन्यद्वाजिदेवत्यं वाजिनद्रव्यकं कर्मोपस्थापयतीति गुणात् कर्मभेदः । यत्र तूत्पत्तौ निर्गुणं कर्म श्रूयते पश्चादनेके गुणाश्च श्रूयन्ते तत्र सर्वेषां गुणानां विकल्पेन निवेशो न तु कर्मभेदकत्वम् यथा ऽग्निहोत्रं जुहोतीत्यत्र दध्ना जुहोतीत्यादीनाम् । अग्निहोत्रं प्रकृत्य श्रूयते दध्नेन्द्रियकामस्य जुहुयादिति तत्र धात्वर्थस्य प्राप्तत्वाद्गुणमात्रं विधेयम् यच्च विधेयम्, तस्यैव फलम् । अतो ऽत्र पूर्वस्मिन्नेव कर्मणि फलाय गुणो विधीयते न तु गुणः कर्म भिनत्तीति । अग्निष्टुति वारवन्तीयमग्निष्टोमसाम कार्यमित्युक्त्वा ऽऽम्नायते एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा ह्येतेन पशुकामो यजेतेति । अत्र पूर्वस्मिन्नेव कर्मणि रेवत्यृगाधारवारवन्तीयलक्षणो गुणः पशुफलाय विधातुं न शक्यते दधिवदऽस्य प्रसिद्धत्वाभावात् । ततश्च प्राप्तकर्मानुवादेन गुणस्वरूपं तत्फलं चेत्युभयं विधातुमशक्यम्,वाक्यभेदात् । तस्मात्कृत्वाशब्दकल्पितरेवतीवारवन्तीयसम्बन्धविशेषितः पूर्वोक्तफलाय विधीयते । एतस्येति षष्ठ्यन्तमपि प्रस्तूयमानमिति न तु पूर्वप्रकृतमित्यपि सिद्धम् ॥ २ ॥

(इति द्वितीयाध्याये द्वितीयः पादः ॥)

यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यदि बृहत्सामा शुक्राग्रानिति प्रकृते ज्योतिष्टोमे ग्रहाग्रत्वमात्रं विधीयते । न तु ततोन्यत्कर्म रथन्तरसामादिकम् । विधिशक्त्युपघातकयदिशब्दात् प्रकरणविच्छेदात् । राजा राजसूयेन स्वाराज्यकामो यजेतेत्यत्र राजशब्दस्य क्षत्रियवाचित्वात् तन्मा-

त्राधिकारिकायामपि राजसूयान्तर्गतायामवेष्टिसंज्ञयामिष्टौह्यदिस-त्रा(?)न्नाद्यकामब्राह्मणादीनामप्येवेष्टिं प्रापयति । एवं वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यः वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमित्येतान्यपि वचनानि यथावर्णमाधानोपनयनयोः प्रापकाणि ॥ कुण्डपायिनामयनाख्ये सत्त्र उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति मासं दर्शपूर्णमासाभ्यां यजेतेत्यत्रापि नैयमिकाग्निहोत्रादेः सत्रे उपस्थित्यसंभवाच्छब्दमात्रेणोपस्थित्यभ्युपगमेऽपि प्राप्तकर्मानुवादेन उपसदानन्तर्यं मासगुणश्चेति विधातुमशक्यम्, वाक्यभेदात् । नच प्राप्ते कर्मणि मासः संपादयितुं शक्यते अनुपादेयत्वात् तस्य । तस्मादनुपादेयगुणसंबन्धानुगृहीतोऽसंनिधिः कर्म भिनत्ति । अनुपादेया गुणास्तु देशः कालो निमित्तं फलं संस्कार्यश्च (र्यश्च) । तच्च सरस्वत्या दक्षिणेन तीरेणाग्नेयोऽष्टाकपालः सत्रायागूर्य विश्वजिता यजेत आग्नेयमष्टाकपालं निर्वपेद्रुक्कामस् त्रैधातव्या दीक्षणीया इत्यश्वमेवेति (?) क्रमेण कर्मभेदोदाहरणानि द्रष्टव्यानि । अत्र दार्शपौर्णमासिकादाग्नेयात् काम्यदैशिकावाग्नेयौ भिन्नौ काम्याभ्यां त्रैधातवीविश्वजिद्भ्यां संस्कारकनैमित्तिकौ तौ भिन्नौ सर्वत्रानुपादेयगुणगणविशेषितासन्निधिरूपप्रकरणान्तरस्य कर्मभेदहेतोस्तुल्यत्वात् । सन्निधौ त्वनुपादेयगुणसम्बन्धेपि न कर्मभेदः यथा समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां यजेत ॥ ३ ॥

(इति द्वितीयाध्याये तृतीयः पादः ॥)

यावज्जीवं दर्शपूर्णमासाभ्यां यजेत एतयान्नाद्ययाजयेत् । शेषात् स्विष्टकृते समवद्यतीति दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विहितात्काम्यात्प्रयोगादन्योयं यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति पुरुषार्थः प्रयोगः । अग्निहोत्रं जुहोतीत्यादयो विधयः शाखाभेदान्न भिद्यन्ते शाखाभेदात् पुनःश्रुत्यनापत्तेः । एकस-

न्निधौ हि पुनःश्रुतिर्भेदिका समिधो यजतीत्यादौ नासन्निधावित्युक्तं प्राक् ॥ ४ पा० ॥

इति भाट्टभाषाप्रकाशे द्वितीयोऽध्यायः ॥२॥

एवं सिद्धे कर्मभेदे भिन्नानां तेषां शेषशेषिभावो निरूप्यते । शेषत्वं च नाविनाभूतत्वम् । आग्नेयादीनां त्रयाणामन्योन्यशेषतापत्तेः । नाप्युपकारकत्वम् । अङ्गमनुष्ठापयतः प्रधानस्यापि शेषतापत्तेः । अतो यः परार्थः स शेषः । पारार्थ्यं च यथायथं द्रव्यगुणकर्मणां वक्ष्यमाणानां व्रीह्याज्यदेशकालानां यागं प्रत्यऽस्ति एवं यागस्य फलं प्रति फलस्य च पुरुषं प्रति । तेन पूर्वः पूर्व उत्तरमुत्तरं प्रति शेषः । उत्तरउत्तरस्तु पूर्वपूर्वं प्रति शेषीति ज्ञेयम् । तत्रापि चतुरो मुष्टीन्निर्वपति व्रीहीन्प्रोक्षति व्रीहीनवहन्ति आज्यमुत्पुनाति शाखां छिनत्तीत्यादय औषधाज्यसान्नाय्यधर्मा योग्यतया व्रीह्यादियोगाच्चौषधादिष्वेव यथायोगं व्यवतिष्ठन्ते । अत्र व्रीह्यादिपदमपूर्वमद्रव्यलक्षकम् । अन्यथा यवादिभ्यः प्रोक्षणादिव्यावृत्त्यापत्त्या परिसंख्यात्वापत्तेः । यथेयं संस्कारव्यवस्था एवं स्फ्येनोद्धन्ति कपालेषु श्रपयति अग्निहोत्रहवण्या निर्वपति उलूखलमुसलाभ्यामवहन्ति शूर्पेण विविनक्ति दृषदुपलाभ्यां पिनष्टीत्यादावपि यथाश्रुतं द्रव्यव्यवस्था । यथेयं द्रव्याणां व्यवस्था गुणव्यवस्थाप्येवम् । अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीत्यादौ आरुण्यस्य क्रयान्वयेऽपि अमूर्त्तत्वात्स्वतः कारकीभवितुमशक्नुवानस्य (वतः) सन्निहितैकहायनीद्वारैव कारकत्वम् न व्यवहितेन वाससा क्रीणातीत्यादिवाक्यावगतवासआदिद्वारेति । एवं क्रमात्संस्कारे द्रव्यगुणविवक्षायामपि ग्रहं सम्मार्ष्टीत्यादौ ग्रहाद्युद्दिश्य सम्मार्गविधौ

उद्देश्यविशेषणीभूतमेकत्वं न विवक्षितम्। (ग्रहं संमार्ष्टि तं चैकमित्यन्वये वाक्यभेदात्)[१]। तस्मात्सर्वेषु ग्रहेषु संमार्गः प्राप्नोति। ग्रहस्वरूपं तु विवक्षितमेव, उक्तदोषाभावात्। तेन न ग्रहपदं सोमपात्रमात्रोपलक्षणमिति न चमसेष्वपि संमार्गप्राप्तिः। सप्तदशारत्निर्वाजपेयस्य यूप इत्यत्र वाजपेयोद्देशेन सप्तदशारत्नित्वविधौ उद्देश्यस्वरूपमप्यविवक्षितम्। तस्य स्वरूपे यूपस्याभावेनानुपयोगात्। नहि वाजपेयस्य यूपोस्ति किं तर्हि अनर्थकं सद् वाजपेयाङ्गभूतेषु पशुषु यूपोस्तीति तत्र साप्तदश्यं निविशते। समिधो यजतीत्यारभ्य प्रयाजानिष्ट्वा हविष्यभिघारयतीत्यन्तं प्रयाजावान्तरप्रकरणं तन्मध्यपठितमभिक्रामञ्जुहोतीत्यभिक्रमणं प्रयाजाङ्गमेव। संदंशमध्यपतितं सत्र महाप्रकरणमनुगच्छतीति। सामिधेनीरन्वाहेत्यारभ्य अन्तरानूच्य सदेवत्वायेत्यन्तं सामिधेन्यवान्तरप्रकरणवद्भासमानमपि तन्मध्यपठितैर्देवोद्रोमन्विद्धे(?) इत्यादिभिलक्ष्मन्मन्त्रैः प्रकरणविच्छेदात्तन्मध्यपतितमपि यदुपव्ययते देवर्निविमेव तत्कुरुत इत्युपवीतं दर्शाद्यङ्गं वारणोयज्ञावचरो वैकङ्कतो यज्ञावचर इति अनारभ्याधीतत्वादात्मकृतिद्वारा यज्ञपदोदिताखिलयज्ञाङ्गत्वे पात्राणामाज्यभागगतयोर्वार्त्रिघ्नलिङ्गकमन्त्रयोर्वृधन्वल्लिङ्गकयोश्च वार्त्रघ्नीः पौर्णमास्यां यजते वृधन्वतीश्चामावास्यायामिति वाक्याद्विनियोगः। हस्तावनेजनादि सर्वकर्माङ्गम्, प्रकरणात्। पुरोडाशं चतुर्द्धा करोतीति सामान्यवचनमाग्नेयं चतुर्द्धा करोतीतिविशेषवचनेनोपसंह्रियते ॥ १ ॥

(इति तृतीयाध्याये प्रथमः पादः ॥)

यद्यपि मन्त्राणां मुख्ययैव वृत्त्या विधेयार्थप्रकाशकत्वं सर्वत्र सिद्धम् तथापि ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यादौ तृतीयाश्रुत्या

---

(१) ( ) एतच्छृङ्खलान्तर्गतः पाठः खपुस्तके "संमार्गः प्राप्नोति" इत्यतः परं वर्त्तते।

ऐन्द्रस्य लक्षणया गार्हपत्यप्रकाशकत्वमुपेयते । श्रुत्यपेक्षयैन्द्रप्रकाशनसामर्थ्यरूपस्य लिङ्गस्य दुर्बलत्वात् सूक्तवाकेन प्रस्तरं प्रहरतीतितृतीयाश्रुत्या इदं द्यावापृथिवी भद्रमभूदित्यादिमन्त्रगणस्य सूक्तवाकसंज्ञस्य प्रस्तरप्रहरणाङ्गता गम्यते तेनाग्निरिदं हविरजुषतेत्यादिमन्त्रवर्णाद्देवता लभ्यते प्रस्तरो द्रव्यं प्रहरतिर्यागवचन इति लभ्यते । न चेष्टदेवताप्रकाशनेन कृतार्थस्य तस्य पुनर्विनियोगो न युज्यत इति तदुपलक्षिते काले स्रुग्धारणादौ कृतार्थस्य प्रस्तरस्य प्रतिपत्तिरत्र विधीयत इति वाच्यम् । किमिव वचनं न कुर्यान्नास्ति वचनस्यातिभार इतिन्यायेन कारकश्रुतेर्लक्षणापेक्षया बलवत्त्वेन च तत्सम्बन्धात्प्रहरतिरिष्टदेवतासंस्कारार्थहोमं विधत्ते इति कल्पनात् । सूक्तवाक्येनेति तृतीयया कृत्स्नस्य तस्य प्रहरणाङ्गत्वेपि लिङ्गवशात्पर्वद्वये विभज्य विनियोगः कल्प्यः । अन्यथा दर्शेग्नीषोमाविदं हविरितिमन्त्रोत्सन्तानर्थकः स्यात् । आनर्थक्यप्रतिहतानां विपरीतं बलाबलमितिन्यायेनात्र लिङ्गबलात् तृतीयाश्रुतिः सूक्तवाकैकदेशं लक्षयति ।

काम्यकाण्डे ऐन्द्राग्नादीन्यज्ञान्विधाय तल्लिङ्कानि याज्यानुवाक्यायुगलान्याम्नातानि इन्द्राग्नी रोचना दिव इत्यादीनी तानि लिङ्गमात्रान्न सर्वत्र विप्लवन्ते किं तु क्रमसमाख्यावशात्स्वस्थान एव निविशन्ते । क्रमः स्थानं सन्निधिरित्येतदनर्थान्तरम् । भक्षे हि मा वेशेत्यादिर्भक्षणमन्त्रस्य भक्षानुवाकसमाख्यामात्रेण कृत्स्नानुवाकस्य न भक्षणार्थत्वं किं तु ग्रहणावेक्षणसम्यग्जरणादेरपि प्रकाशनाद्यथालिङ्गं ग्रहणादौ मन्त्रा व्यवतिष्ठते । भक्षमन्त्रे इन्द्रपीतस्येति पदमनैन्द्राणां सोमानां भक्षणे ग्रहं निवृत्तिं वा न भजते तद्धेतोरिन्द्रेण पीतस्येत्यस्यार्थस्याविवक्षितत्वात् किंतु इन्द्रेण पीतः सोमो यस्मिन्सवने तदिन्द्रपीतम् तस्य संबन्धिनं सोमं भक्षयामीत्यस्यार्थो विवक्षितः । ऊहलोपहेतोस्तृतीयातत्पुरुषादन्यपदार्थप्रधानस्यापि बहु-

व्रीहिसमासस्य लघुत्वात्। सर्वे च सोमा एवंविधसवनसम्बन्धिन इति सर्वेषां यथाम्नातमन्त्रकम्भक्षणम् ॥ २ ॥

(इति तृतीयाध्याये द्वितीयः पादः ॥)

श्रुतिलिङ्गयोर्विनियोग उक्तः वाक्यप्रकरणस्थानसमाख्याभिर्विनियोगश्चिन्त्यते। तत्र त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद इत्यर्थवादेनोपक्रम्य उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्नेत्युच्चैस्त्वादिकं विधीयते। तत्र मन्त्रब्राह्मणसमुदायो वेदः पादबन्धवती गायत्र्यादिरेव ऋक्। असंजातविरोधिनोपक्रमगतवेदपदेन संजातविरोधिविध्युद्देशात्तमपि ऋगादिपदं स्वविषये व्यवस्थाप्यते। न तु विधिप्राधान्यात् वैपरीत्यं वक्तुं शक्यम्। यत्र विरोधस्तत्रैव लक्षणाया औचित्यात्। गुणे त्वन्याय्यकल्पनेत्यस्यानुपसंजातविरोधिन्यर्थवादेऽप्यप्रवृत्तेः। तस्मादृक्पदेन ऋग्वेद एव ग्राह्यो न ऋङ्मात्रम्। तेन ऋग्वेदान्तर्गतानां यजुषामप्युच्चैस्त्वं यजुर्वेदगतानामृचामप्युपांशुत्वं फलम्। अत्रोपक्रमोपसंहारैकवाक्यतया वेदधर्मोऽयमवधारित इति वाक्यवशेनायं विनियोगः। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यतो दर्शपूर्णमासाभ्यां स्वर्गं भावयेदित्यवगते केन प्रकारेण भावयेदित्याकाङ्क्षायामाह समिधो यजति व्रीहीनवहन्तीत्यादि। तेनायमर्थः समिदादिभिरारादुपकारिभिरवघातादिभिः संनिपत्योपकारिभिश्चाङ्गैः संपन्नौ तौ यथा फलं साधयितुं क्षमौ भवतस्तथा यजेतेति गम्यते। ततश्च उपकारकार्थिनि यागे उपकर्तुं समर्थानां प्रयोजनाकाङ्क्षाणामङ्गानाञ्चान्योन्याकाङ्क्षालक्षणेन प्रकरणेन शेषभावः। दर्शपूर्णमासादौ येन क्रमेण कर्मणामाम्नानम् तेनैव मन्त्राणामप्यस्तीति उपांशुयाजस्थाने पठितो दब्धिर्नामासीतिमन्त्रः श्रुत्याद्यभावेपि स्थानप्रमाणादेवोपांशुयाजाङ्गत्वं भजते। दर्शपूर्णमासादिष्वाध्वर्यवहौत्रौद्गात्रादिस-

माख्ययाख्याताः पदार्थाः कर्त्रपेक्षाः सन्ति। तेषां येन केनचिद्यत् किंचित्कर्म कर्त्तव्यमित्यनियमे प्राप्ते समाख्यया प्रमाणेन क्रियाकर्तृसम्बन्धः सिध्यति ॥ ॥

अथैतेषां बलाबलं चिन्त्यते तत्र सूत्रम् श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति । एतेषु श्रुत्यादिषु परंपरं दुर्बलम् कुतः अर्थविप्रकर्षात् । श्रुतिर्हि निरपेक्षशब्दरूपा स्वयमेव विनियोक्त्री भवति, लिङ्गं तु श्रुतिं कल्पयित्वा विनियोजकम् न स्वातन्त्र्येण । एवं वाक्यं लिङ्गश्रुती प्रकल्प्य विनियोजकम् । एवं प्रकरणं त्रयस्य कल्पनया, स्थानं चतुष्टयस्य समाख्या पञ्चकस्येति विप्रकर्षो ज्ञेयः । तत्र श्रुतिलिङ्गयोर्विरोधे श्रुतेर्बलीयस्त्वमुक्तम् । ऐन्द्र्या गार्हपत्यमित्यत्र लिङ्गवाक्ययोर्विरोधेपि स्योनं त इत्यत्र वाक्यात्कृत्स्नस्यैकमन्त्रत्वे प्राप्ते लिङ्गात् सदनकरणस्थापनरूपार्थद्वयप्रकाशकान्मन्त्रभेद इत्यप्युक्तम् । वाक्यप्रकरणयोर्विरोधोदाहरणं सूक्तवाके । स च लिङ्गवशात्पर्वद्वये विभज्य विनियोज्य इत्युक्तम् । तत्र इदं हविरजुषेतामित्यादीनि पदानि प्रकरणाविशेषेप्यन्यत्र न प्रयुज्यन्ते । अपि तु वाक्यस्य बलवत्त्वादग्नीषोमावित्यनेनैव सम्बध्यन्ते । ततश्चैकवाक्यत्वादग्नीषोमलिङ्गप्रकाशनसामर्थ्यं ततः श्रुतिस्ततो विनियोग इति सन्निकर्षः । इन्द्राग्नीपदेन तु प्रकरणद्वारैकवाक्यत्वमिति विप्रकर्षः । तस्माद्वाक्यं प्रकरणाद्बलवत् । स्थानप्रकरणयोर्विरोधस्तु इष्टिपशुसोमयोगात्मके राजसूयेऽभिषेचनीयाख्यः सोमयागोस्ति तत्सन्निधौ पठिता हि देवनादयः । यावत् प्राकृताङ्गैःकथंभावे निराकाङ्क्षेभिषेचनीये ऽथ यथाकथंचित्सन्निधानादाकाङ्क्षां प्रकल्प्याङ्गत्वं कल्प्यते, ततः प्रागेव प्रकरणाद्राजसूयाङ्गत्वमेषां गम्यते। अतः सन्निधेःप्रकरणं बलवत् । क्रमसमाख्ययोर्विरोधस्तु पौरोडाशिकसमाख्यकाण्डे सान्नाय्यपात्रशुन्धन-

क्रमे शुन्धध्वमितिमन्त्रो यावत् समाख्यया सम्बन्धं प्रकल्प्य पुरोडाशाङ्गतां नीयते, तावत्सन्निधिः क्लृप्तसम्बन्धद्वारा आकाङ्क्षाक्रमेणैकवाक्यत्वं ततः सामर्थ्यं ततः श्रुतिं च प्रकल्प्य तस्य सान्नाय्याङ्गत्वं विधत्त इति समाख्यातः सन्निधिर्बलवान्। अत्र श्रुत्यादिभिर्लिङ्गादीनां बाधः कल्पनामूलोच्छेदाल्लैङ्गिकादिकल्प्यपदार्थस्य अप्राप्तत्वादेव। प्राकृताः कुशादयस्तु प्राप्ता एव सन्तो वैकृतैः शरैर्बाध्यन्ते। एवमाहवनीये जुहोतीति सामान्यशास्त्रेण प्राप्त एवाहवनीयः पदे जुहोतीत्यनेन विशेषेण बाधात् इति तार्तीयीकादप्राप्तबाधाद्दाशमिकः प्राप्तबाधो विलक्षण इति ज्ञेयम्। ज्योतिष्टोमे तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येत्यत्राहीनपदं न हीन इति योगाज्ज्योतिष्टोमं वक्ति तत्रैव द्वादशोपसत्त्वमपि विधीयत इति, न,अन्हां समूहोऽहीन इति द्विरात्रादावहीनशब्दस्य रूढत्वात्। अह्नः खः क्रताविसहःशब्दात्समूहेऽर्थे खप्रत्ययस्तस्याऽऽयादिसूत्रेण ईनादेशे आद्युदात्तश्चेतिप्रत्ययस्वरेण ईकारस्योदात्तत्वे मध्योदात्तं पदं चात्र पठ्यते। नञ्समासे त्वव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तत्वं स्यान्नच तथा पठन्ति। तस्मादहर्गणाङ्गत्वाद्द्वादशोपसत्त्वम्। त्र्युपसत्त्वं स्तुत्यर्थम् अत्र कीर्त्यमानमित उत्कृष्यते। तत्रैव युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादित्यत्र द्वित्वं न स्त्रीपुंसनिमित्तम्। अग्नीषोमयोर्देवतात्ववत्तयोर्यजमानत्वस्यव्यासक्तत्वात्। सोमेन यजेत वसन्तेवसन्ते ज्योतिषा यजेतेत्युत्पत्तिप्रयोगचोदनयोराख्यातोपात्तं गुणभूतोपादेयकर्तृगतमेकत्वं विवक्षितमेव अतो द्वियजमानत्वं कुलायाऽहीनादिषु उत्कृष्यत एव। दर्शपूर्णमासयोः पश्वभावेपि जाघन्या पत्नीः संयाजयतीत्यत्रोत्कृष्यते। तृतीयाश्रुत्या यागाङ्गत्वेन तद्विधीयमानत्वाल्लौकिक्यापि जाघन्या पत्नीसंयाजानां द्रव्याकाङ्क्षानिवृत्त्यापत्तेः। दर्शपूर्णमासयोः पूषा प्रपिष्ट-

भाग इति श्रुतं तत्र प्रकरणे पूषाभावाद्यत्र चातुर्मास्यादौ पौष्णगवश्चरुस्तत्र उत्कृष्यते। पुरोडाशे प्राप्तत्वात्पशौ च हृदयादिस्वरूपनाशापत्तेः पेषणस्याविधेयत्वात्पिष्टचरावपि पाकवैशद्येन चरुशब्दप्रयोगोपपत्तेश्च। एवं च पौष्णे पेषणं देवतान्तरविशिष्टे तु पूष्णि न पेषणं। विशिष्टस्यातिरिक्तत्वात्तत्र केवलधर्मस्याप्रवृत्तेः॥ ३॥

(इति तृतीयाध्याये तृतीयः पादः॥)

दर्शपूर्णमासयोर्निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययत इति श्रुतम्। तत्र सदोपवीतिना भाव्यमिति स्मृतेर्नित्यमुपव्यवीतस्य प्राप्तिरस्तीति निवीतमित्यर्थवादः। उपवीतं च स्मृत्या पुरुषार्थत्वेन प्राप्तमपि क्रत्वर्थं पुनर्विधीयते। सम्भवति हि पुमर्थोल्लङ्घनेपि क्रत्ववैगुण्यं मन्यमानस्य तद्प्राप्तिरिति। एवं तत्रैव नानृतं वदेदित्यस्यापि पुनर्विधिर्ज्ञेयः। स्मृताग्निहोत्रे अधस्तात्समिधं धारयन्नुपद्रवत्युपरि हि देवेभ्यो धारयतीति विज्ञायत इत्यत्र परप्रकरणे ऽप्राप्तत्वादुपरिधारणमपि विधीयते दर्शपूर्णमासयोः। तस्माज्जम्भ्यमानो नुब्रूयान्मयि दक्षक्रतू इति मन्त्रवाक्यप्रकरणयोरविरोधात् क्रतावपि जृम्भायाः सम्भवात् न प्रकृतं क्रतुमुल्लङ्घ्य वाक्येन पुरुषार्थोपि स्यादिति। तत्रैव तस्माद् ब्राह्मणाय नावगुरेतेत्यवगोरणनिषेधस्तु यो ब्राह्मणायावगुरेत तं शतेन यातयादित्यनेन यातनाख्यपृथक्फलश्रवणात् क्रतुमुल्लङ्घ्यापि पुरुषार्थं पर्यवतिष्ठते। एवं मलवद्वाससा न संवदेतेत्यपि पुमर्थमेव तामपरुध्य यजेतेतिवचनेन क्रतुमध्ये ऽपरुद्धया तया सह संवादाप्रसक्तेः। तस्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णोऽस्य भ्रातृव्यो भवतीत्यत्र पुरुषार्था स्वर्णधृतिः पूर्वोक्ता चारुणेष्टिर्वैदिके एव अश्वदाने न तु लौकिके। दर्शपूर्णमासयोराग्नेयो ऽष्टाकपालो भवति तथा उपस्तृणाति अभिघारय-

ति द्विर्हविषोऽवद्यति चतुरवत्तं जुहोतीत्यत्र कृत्स्नस्य पुरोडाशस्य यागीयद्रव्यत्वेपि प्रक्षेपोऽवदानमात्रस्यैव कर्त्तव्य इति भाष्ये । अवदानमेव यागीयं द्रव्यमिति वार्त्तिके । एवं च अवत्तनाशे पुनरायतनादवदानं श्रूयमाणमुपपद्यते ऽन्यथा तदनर्थकं स्यात् पुनः कृत्स्नस्योत्पत्तिश्च स्यात् । हुतेषु अवदानेषु शेषाणां प्रतिपत्त्यपेक्षत्वात् सर्वेभ्यो हविर्भ्यः स्विष्टकृदादीनि स्युः शेषकार्याणि। आग्नेयं चतुर्धा कृत्वा इदं ब्रह्मण इदं होतुरिदमध्वर्यो-रिदमग्नीध इति निर्देशे न ऋत्विजामानत्यर्थः परिक्रयो न कर्तुं शक्यते सकलस्य हविषो देवतायै प्रत्तत्वात्तत्र यजमानस्य स्वाम्याभावेन ततः परिक्रयायोगात् । शेषस्य तु प्रतिपत्त्यपेक्षत्वाद्भक्षणार्थ एवायं निर्देशः ॥ ४ ॥

(इति तृतीयाध्याये चतुर्थः पादः ॥)

उपांशुयाजद्रव्याद्ध्रौवाज्यादपि स्विष्टकृदादीनि प्रतिपत्तिकर्माणि कर्त्तव्यानीत्येतद्भाव्युपस्तरणाद्युपयोगिनोऽकृतार्थस्य ध्रौवस्य प्रतिपत्त्यनपेक्षत्वात् सर्वान्ते च तच्छेषेण समिष्टयजुर्होमः क्रियत इति न ततः शेषकार्याणां प्राप्तिः प्रकृतिहोमार्थं जुह्वभिक्रमणमस्ति साकंप्रस्थायीये तु सह कुम्भीभिरभिक्रामतीति जुहूमपहाय कुम्भीरेव होमकार्ये निवेशयेदित्यवगम्यते । ततश्च तत्रापि शेषाभावान्न शेषकार्यप्राप्तिः । अत्र सोमभक्षो बहुप्रकारो विचारितः। यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं विभक्षयिषेन्न्यग्रोधस्तिभिनीराहृत्य ताः सम्पिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममित्यत्र यद्यपि स्तिभिनीचमसस्य उपक्रमोपसंहारयोर्भक्षमात्रे सम्बन्धोस्ति तथापि सोमभक्षस्थाने निवेश्यमानो ऽयं तद्वदेव यागीयद्रव्यसंस्काररूपो भविष्यतीति भक्षसम्बन्धकथनव्याजेन तद्द्वारावगतयागसाधनत्वेनायं फलचमसो विधीयते तद्विधौ च भक्षः प्राप्त एवानूद्यते । एवं सोमाभावे पूतीकानभि-

षुणुयादित्यभिषवयुक्तपूतीकानामपि यागसाधनत्वं ज्ञेयम् ॥ ९ ॥

(इति तृतीयाध्याये पञ्चमः पादः ॥)

यस्य पर्णमयी जुहूर्भवति इत्यनारभ्याधीतं पर्णतादिकं प्रकृतिद्वारैव विकृतिं प्रतिपद्यते जुह्वादिवत् । न तु विकृतावपि तद्विधानं न्याय्यम् । अतिदेशेन जुहूद्वारैतत्प्राप्तौ सत्यां पुनर्विधानायोगात् । सप्तदश सामिधेनीरनुब्रूयादित्यनारभ्याधीतं साप्तदश्यं पाञ्चदश्यावरुद्धायां प्रकृतौ निवेशमलभमानं विकृतिमेवाश्रयते तत्रापि श्रुतं साप्तदश्यं मित्रविन्दादिकामेवेति वक्ष्यते । सामान्यतः प्रथमं प्राप्तं ब्राह्मणादिषु सावकाशं च नित्यं पाञ्चदश्यं साप्तदश्यं वैश्यस्येति वैश्ये निमित्ते नैमित्तिके विशेषेण साप्तदश्येन पश्चात्यतया पूर्वबाधं विना जात्वात्मानमलभमानेन वैश्यमात्रविषयतया निरवकाशेन बाध्यते । एतैरेव हेतुभिः काम्यमेकविंशतिं प्रजाकाम इत्येकविंशत्याद्यनुवचनं नित्यस्य पाञ्चदश्यस्य बाधकं न त्वऽपुरुषार्थत्वान्नैमित्तिकस्यापि साप्तदश्यस्य । एतेन चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्येति गोदोहनेन चमसबाधो व्याख्यातः । आधानं पवमानेष्टयश्च मिथः सन्निहिताः समाम्नाताः । तत्र फलवदग्निहोत्राद्यर्थत्वादग्नयः फलवन्तस्तदर्थमाधानम् इष्टयस्तु अग्न्यङ्गमाधानाङ्गं वेत्यन्यदेतत् । ननु जुहूद्वारा पर्णतेवाग्निद्वारा आधानमपि प्रकृत्यर्थमेवेति चेन्न दृष्टान्तवैषम्यात् । लोकप्रसिद्धजुहूस्वरूपस्यान्यतोपि सम्भवेन पर्णतायास्तत्स्वरूपे आनर्थक्यादगत्या प्रकृत्यङ्गत्वम् । आहवनीयादेस्त्वदृष्टरूपत्वेनाधानस्य तत्स्वरूप एवार्थवत्त्वात्तदर्थमेवाधानमित्यर्थः । नैमित्तिकं क्रत्वर्थस्तिभिन्यादिवन्नित्येन सोमेन समानविधानं भवत्यनित्यत्वात् । तेन तत्र सोम इव क्रयादेरप्राप्तिः । प्रतिनिधौ तु शिष्टव्रीह्यादिद्रव्यसादृश्यादुपादीयमाने नीवारादौ मुख्येन समानविधानं भवत्येव । मुख्यद्रव्यावयवानां बहूनां

तत्र दर्शनात् । एवं विसदृशेपि सोमाभावे पूतीकानभिषुणुयादिति वाचनिके प्रतिनिधावपि वचनबलादेव सादृश्यं मुख्येन सह समानविधानत्वं च ज्ञेयम् ॥ ६ ॥

(इति तृतीयाध्याये षष्ठः पादः ॥)

वेदिं खनतीत्यादीनां वेद्यादिधर्माणां वेद्यां हवींष्यासादयतीत्यङ्गप्रधानसाधारणहविःशब्दात्साधारण्यं प्रधानहविर्मात्रार्थत्वेन हविःशब्दस्य संकोचे नियामकाभावात् । केशश्मश्रुवापादयस्तु नाङ्गप्रधानार्थाः । क्रियाङ्गभूतकर्त्रंशानन्तःपातित्वात् असंस्कृतस्यापि कर्तृत्वसंभवाच्च । भोक्तृत्वं तु क्रियां प्रति प्रधानभूतमदृष्टं च । अतस्तद्गुणभूताःसंस्काराः प्रधानार्था न तु गुणार्थाः । गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यादितिन्यायेन तेषां गुणानां विशेषेणापि यागाङ्गित्वायोगात् । यजेत स्वर्गकाम इत्यात्मनेपदात्कर्तृगामित्वं क्रियाफलस्य गम्यते । कर्तृत्वं च हविस्त्यागदक्षिणादानादेरन्यत्र प्रयोजकत्वेनापि यजमानस्य संभवति नित्यवदाम्नातपरिक्रयसामर्थ्यादेकेन कृत्स्ने तत्रानुष्ठानायोगादन्यैरपि कारयितव्यम् । ते च इष्टौ नामभेदाद्वरणभेदाच्च चत्वारः ब्रह्मा होताध्वर्युरग्नीदिति । चातुर्मास्येषु प्रतिप्रस्थाता पञ्चमः । पशौ मैत्रावरुणः षष्ठः । सोमे मुख्याश्चत्वारो ब्रह्मा होताध्वर्युरुद्गातेति । ब्राह्मणाच्छंस्याग्नीध्रः पोता चेति ब्रह्मणो द्वितीयतृतीयचतुर्थाः । होतुस्तु मैत्रावरुणो ऽच्छावाको ग्रावस्तुच्च । अध्वर्योः प्रतिप्रस्थाता नेष्टोन्नेता च । उद्गातुः प्रस्तोता प्रतिहर्ता सुब्रह्मण्या च । सदस्यः सप्तदशो वैकल्पिकः तदभावे यजमानः सप्तदशः पत्नी अष्टादशी । दश चमसाध्वर्यवः शमिता सोमविक्रयी चेति द्वादश तेभ्योन्ये । उदगातारस्त्वृत्विक्ष्वेवान्तर्भूताः । तेषां च कार्यव्यवस्था आध्वर्यवं हौत्रमौद्गात्रमितिकाण्डसमाख्यावशादेव । आहवनीये जुहोतीत्यादिवचनप्रापिता आहवनीयादयः

रसीत्यध्वर्योर्मन्त्रः। युवा सुवासा इति होतुः। कुण्डपायिनामयनादौ ऋत्विक्समासे यो होता सोऽध्वर्युरित्यध्वर्युकार्ये विहितस्य होतुः वाचनिको ऽध्वर्युमन्त्रः चोदकप्राप्तहोतृमन्त्रं बाधते। प्रैषाणां तदर्थानां च कर्तारोऽन्ये। प्रोक्षणीरासादयेत्यादिमध्यमपुरुषप्रयोगाल्लिङ्गात्। तत्रापि प्रैषकर्ताध्वर्युस्तदर्थकर्ताग्नीदादिः। ममाग्ने वर्चो विहवेष्वस्त्वित्यध्वर्युमन्त्राङ्गं फलम् मम यजमानस्येत्यध्याहारेण यजमानगतमेव। मा मा सन्ताप्तमित्यादिकमृत्विग्गतमेव। तन्नौ सहेत्याद्युभयगतम्। एवमन्यदप्यूह्यम् ॥ ८ ॥ (इत्यष्टमः पादः ॥)

इति भाट्टभाषाप्रकाशे तृतीयोऽध्यायः ॥ ३ ॥

अथ यत्रानेकः शेषी तत्र कः शेषं प्रयुङ्क्ते को नेति चिन्ता। तत्फलं च पुरोडाशकपालेन तुषानुपवपतीत्यादौ कपालस्य तुषोपवापाङ्गत्वेऽपि यत्र सौर्ये चरौ तुषोपवापे सत्यपि कपालं नासादनीयम् कपालेषु पुरोडाशं श्रपयतीति तत्प्रयोजकस्य पुरोडाशस्याभावात्, तादृशस्थले हस्तेनैव तुषोपवाप इति। तत्र यत् क्रतोः साधनम् तत् क्रतुप्रयोज्यं क्रत्वर्थम्। यत्पुरुषं प्रीणयति रागसिद्धप्रवृत्तेः फलादन्यद् द्रव्यादिकम् तत्पुरुषप्रयोज्यं पुमर्थम्। यथा चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्येत्यत्र प्रणयनमाश्रित्य पुरुषार्थं साधयद्गोदोहनम् अर्थात्क्रतुमप्युपकरोति। एवं द्रव्यार्जनमपि। तस्य क्रत्वर्थत्वे ऽन्यायेना[१]प्यर्जितेनारम्भसिद्धेरप वा एष सुवर्गाल्लोकाच्च्यवत इति क्रत्वनुपक्रमे दोषदर्शनं न सङ्गच्छते। तस्मात्तदपि पुमर्थमेव सत् क्रतावप्युपकरोति॥ नेक्षेतोद्यन्तमादित्यमित्यत्र नञः क्रियान्वये यत्र क्रत्वर्थमुद्यदादित्यावेक्षणं प्राप्तम् तस्य प्रतिषेधो भवति। ततश्च ग्रहणाग्रहणवत्तद्विकल्पे नञर्थश्च श्रौतो लभ्यते। तथापि तस्य व्रतमित्युपक्रमानन-

---

(१) क्रत्वर्थत्वे ऽन्येनेत्युभयपुस्तकपाठः।

गुणत्वान्निषेधपक्षमपहाय उपपदार्थेन नञोन्वयात् पर्युदासपक्षमाश्रित्य अनीक्षणसंकल्पो लक्ष्यते। तेन विकल्पदोषो नानुषज्यते। एतावता हैनसा युक्तो भवतीति वाक्यशेषरूपं फलवचनमर्थवद्भवति॥ पशुना यजेतेत्यत्र पशुरुपादेयः। तत्र कारकाणां क्रिययैवान्वय इति नियमात्कारकेण समानप्रत्ययश्रुत्याऽऽत्मसात्कृता संख्या तद्द्वारा क्रियामेवोपसर्पति न समानपदोपात्तमपि कारकापेक्षया व्यवहितं पशुं स्पृशति। तेन सर्वत्रोपादेयगतं विशेषणं विवक्षितमेव॥ एवं लिङ्गमप्युपादेयगतं विवक्षितमेव सिंहः सिंहीत्यादौ ततोप्यर्थविशेषप्रतिपत्तेः॥ स्विष्टकृदादीनि स्मरणांशेन प्रतिपत्त्यंशेन च यागीयद्रव्यदेवतं संस्कुर्वन्ति यागांशेनादृष्टमपि कुर्वन्तीति ज्ञेयम्। यथार्थतः सन्निधानादुपादेयगतमेकत्वादिकं क्रियाप्रयोज्यम् एवं तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्रापि सेति तत्पदेन प्रकृतस्य पयस एवामिक्षात्वावगमात्तस्यैव च द्विकर्माणमानयतिं प्रति मुख्यकर्मत्वावगमात्तदेवानयनं प्रयुङ्क्ते न तु वाजिनम् शब्दतोर्थतश्च व्यवधानात्। उत्तरार्द्धात्स्विष्टकृतमित्युत्तरार्द्धार्थं न हविरन्तरं कर्त्तव्यम् अपि तु विनियुक्तस्यैवायं विनियोगः। वाक्यात्तु प्रयाजशेषेण हवींष्यभिघारयतीति श्रुत्या गम्यमानोपि हविःसंस्कारो ऽदृष्टार्थत्वान्नाद्रियते शेषे प्रतिपत्तिरूपदृष्टप्रयोजने सम्भवति तदयोगात्। अतः प्रधानशेषहविरधिकरणेन क्षारणेन संस्कुर्यादिति तदर्थः। अधिकरणनियमात्तत्संस्कारोपि इत्युभयार्थत्वमपि। फलं तु वाजपेयक्रतुपशूनां प्राजापत्येन च सहोपपक्रमेपि प्रातःसवने क्रतुपशूनामालम्भो मध्यन्दिने इतरेषाम् तत्र प्राजापत्यपयोभिघारणार्थं शेषः स्थाप्य इति पूर्वपक्षे न स्थाप्य इति सिद्धान्ते॥ १॥

(इति चतुर्थाध्याये प्रथमः पादः॥)

यूपस्य स्वरुं करोतीत्यादौ यूपस्य विधिना स्वरुकरणं न विधेयं लक्षणागौरवात् । स्वरुणा पशुमनक्तीति अञ्जनार्थत्वेन प्राप्तः स्वरुः कुत उपादेय इत्याकाङ्क्षायां यूपस्येति षष्ठ्या तस्य यूपापादनकत्वं गम्यते । तथाचात्मार्थं विधानं भवति । एवं मूलतः शाखां परिवास्योपवेषं करोतीत्यत्र परिवासनस्य शाखैव प्रयोजिका द्वितीयाश्रवणात् न तु मूलम् तदनुनिष्पन्नत्वात् । तेन शाखाया अभावे यतःकुतश्चित्काष्ठादुपवेषः कर्त्तव्यः । यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्,तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात् (२७, २८ सूत्रे) । यदाग्नेयोऽष्टाकपाल इत्याद्युत्पत्तिवाक्येषु यजेरश्रवणेपि यत्र द्रव्यदेवतं दृश्यते तत्र यजिरस्तीत्यवगन्तव्यम् । होमस्तु यज्युक्त एवार्थे । चतुरवत्तं जुहोतीतिवाक्यात् आसेचनमधिकं विधीयते ॥ २ ॥

(इति चतुर्थाध्याये द्वितीयः पादः ॥)

एकस्य तूभयार्थत्वे संयोगपृथक्त्वम् अग्निहोत्रे दध्नेन्द्रियकामस्य जुहुयात् दध्ना जुहोतीति वाक्यद्वयं पृथग्विपरिवृत्तिलब्धहोमाश्रयं मिथोनिराकाङ्क्षतया न सम्बध्यते यद्दध्ना जुहुयात्तदिन्द्रियकामस्येति । तेन नित्यार्थं कामार्थं चेत्युभयार्थं दधि संयोगपृथक्त्वात् ॥ स्वर्ग आमुष्मिक एव ॥ कारीर्या वृष्टिकामो यजेतेति कारीरी शुष्यत्सस्यसंजीवनकामस्य विहितेत्यैहिकफलैव ॥ चित्रया यजेत पशुकाम इति चित्रादिफलं त्वसति प्रतिबन्धके ऐहिक,मन्यथाऽऽमुष्मिकम् ॥ वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र वाजपेयप्रकरणात् तदङ्गत्वेन बृहस्पतिसवाख्यं कर्मान्तरं विधीयते । पौरोहित्यकामस्य यो बृहस्पतिसवस्तस्यात्रानुपस्थितेस्तत्सदृशत्वलाभार्थं तन्नामकत्वमत्र ज्ञेयम् कुण्डपायिनामयनस्था(मासा)ग्निहोत्रवत् ॥ ज्योतिष्टोमप्रकरणे तु दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति तु कालार्थः संयोगो न त्वङ्गाङ्गिभा-

वार्थः ज्योतिष्टोमप्रकरणात् ॥ वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इत्युपक्रम्य यस्मिन् जात एतामिष्टिं निर्वपति पूत एव स इत्यादिफलं जातगतं ज्ञेयम् वचनात्। न च शास्त्रफलं प्रयोक्तरीतिन्यायविरोधः गुणवत्पुत्रताया अपि पितुः प्रीतिकरत्वेन तदनुग्रहस्यापि लाभात् ॥३॥

(इति चतुर्थाध्याये तृतीयः पादः ॥)

पितृयज्ञः स्वकालविधानादनङ्गं स्यात् अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीत्यत्रामावास्यापदेन कर्मोपादाय तदङ्गत्वं पितृयज्ञस्य। ततश्च फलकल्पनापि नास्तीति प्राप्य काले शब्दस्य मुख्यत्वात् अपराह्ण इति कालसामानाधिकरण्याच्च पितृयज्ञः स्वकालविहितो नेष्ट्यङ्गम् ॥ ४ ॥

(इति चतुर्थः पादः ॥)

इति भाट्टभाषाप्रकाशे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

एवं सिद्धानां प्रयोज्यानां क्रमो विचार्यते। अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीत्यत्र न पूतः पावयेदितिवचनादऽदीक्षित एवाध्वर्युरन्यान् दीक्षयति सत्रे। तत्र हि ये यजमानास्त एव ऋत्विज इति सर्वेषां दीक्षाया आवश्यकत्वात्। अध्वर्य्वादिसंज्ञाश्च तत्कार्यपरिग्रहात्। तं च ब्रह्मचारी वाचार्यप्रेषित इत्यन्तमयं श्रौतः क्रमः स्वाश्रुत्यवगतः। अग्निहोत्रं जुहोति यवागूं पचतीत्यादावार्थक्रमः। पाकस्य होमार्थत्वे दृष्टार्थतालाभादत्र पाठक्रमो नाद्रियते, होमोत्तरं यवागूपाकस्यादृष्टार्थापत्तेः॥ समिधो यजति तनूनपातं यजतीत्यादौ पाठक्रम एव। सप्तदश प्राजापत्यान्पशूनालभत इत्यत्र पशूनामुपाकरणप्रोक्षणसंज्ञपनादिषु प्रथमः पदार्थो येन क्रमेण प्रवृत्तस्तेनैव क्रमेण द्वितीयादयः पदार्थाः कर्त्तव्याः। सोयं प्रवृत्तिक्रमः प्रधानस्याङ्गैः सह न्यूनमधिकं वा विप्र-

कर्षमसहमानस्यानुरोधादाश्रीयते । साद्यस्क्रे सवनीयस्थाने सह पशुना ऽऽलभत इत्युक्तम् । तत्र स्थानिनः स्वस्थानात्प्रच्युतौ कारणाभावात् प्राथम्यम् । अग्नीषोमीयानुबन्ध्ययोस्तु ततः परं प्राप्तयोः प्रकृतौ दृष्टं पौर्वापर्यमसति बाधके नोल्लङ्घनीयमिति द्वितीयोऽग्नीषोमीयस्तृतीय आनुबन्ध्य इति तेनैव क्रमेण तेषां प्रोक्षणादयः ॥ सारस्वतौ भवत इति सरस्वतीदेवतः सरस्वद्देवत इति च यागद्वयं श्रुतम् । तत्र याज्यानुवाक्यायुगलक्रमो मुख्यः । तेन स्त्रीदेवतस्य पूर्वं निर्वापः पश्चात्पुंदेवतस्येति प्रवृत्तिक्रमेणैव तत्सिद्धमित्युदाहरणान्तरं मृग्यम् । तत्र दर्शपूर्णमासयोः प्रथमं दधिधर्माः शाखाहरणादयः समाम्नाताः पश्चादाग्नेयधर्मा निर्वापादयः याज्यानुवाक्यायुगलक्रमस्तु विपर्ययेण । अतस्तत्र प्रवृत्तिद्वयसत्त्वेऽपि मुख्यक्रमेणैव नियमः । तेन प्रथमं प्रयाजशेषेणाग्नेयस्याभिघारणं पश्चाद्दध्न इत्यादि फलम् । दर्शपूर्णमासयोरेव प्रथममग्नीषोमीयस्य ब्राह्मणं पश्चादाग्नेयस्य । याज्यानुवाक्याक्रमस्तु विपरीतोऽस्ति । तत्रापि स्मृत्येकप्रयोजना मन्त्रा इति पाठक्रम एव बलवान् ॥ एवमप्यङ्गानां पाठक्रमो बलीयाननपेक्षत्वात् । तेनाग्नेयाग्नीषोमीययोरन्तराले मुख्यक्रमानुरोधात्प्राप्तोऽपि उपांशुयाजार्थाज्यनिर्वापो यथापाठमेव भवति । अत एव प्राकृतात् क्रमान्निराकाङ्क्षायामाग्नावैष्णवमेकादशकपालं निर्वपेत्सारस्वत्याज्यभागा बार्हस्पत्यश्चरुरित्यादिविकृतौ न कर्मान्तरकल्पना । अग्नीषोमीये पशौ प्रकृतितः हविरासादनान्ते प्राप्ताः प्रयाजास्तिष्ठन्तं पशुं प्रयजन्तीत्यपकृष्यमाणा आघारानप्यपकर्षन्ति ततः पूर्वं तेषामनुष्ठाने क्लृप्तक्रमलोपाद्वैगुण्यं स्यादिति तदन्तापकर्षः । एवमाग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीत्यत्रापि तदाद्युत्कर्षः । तत्रापि तदनन्तरं कर्त्तव्यस्य सूक्तवाकस्य ततः प्राक्करणे क्लृप्तक्रमभङ्गात् । अमावस्यायां वेदं कृत्वा वेदिं करोतीत्यपकृष्यमाणा वेदिः स्व-

स्मात् पूर्वान्हविरभिवासनान्तान् नापकर्षेत्। निर्वापादीनां परेद्युश्चोदितत्वात् तेन तत्र तन्मात्रापकर्षः। मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुमित्याम्नाता सांतपनीया दैवान्मानुषाद्वा [प्रतिबन्धात्] यावत्सायमुत्कृष्टा चेत् सायमस्तमिते जुहोतीति कालस्यानुपादेयत्वेन यावज्जीवमग्निहोत्रं जुहुयादिति जीवनरूपनिमित्तविशेषणत्वात्तत्र प्राप्तमग्निहोत्रं किंचिदङ्गमपहायापि कृत्वैव सान्तपनीया कर्त्तव्या ॥ १ ॥

(इति पञ्चमाध्यायस्य प्रथमः पादः ॥)

वाजपेये प्राजापत्यानां पशूनामेकस्योपकरणादि प्रदानान्तं कृत्वा परस्य तथैव कर्त्तव्यमिति काल्पनिकः काण्डानुसमयः वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीत्येककालप्रयोगेण बाध्यते। तमनु उपाकरणादयोपि तेषामेककाला एव प्राप्ताः सन्तोऽशक्यत्वात् क्रमेण क्रियन्त इति पदार्थानुसमय एवात्र बोध्यः। यत्राश्वप्रतिग्रहेष्ट्यां शतं सहस्रं वा पुरोडाशास्तत्र पदार्थानुसमये सर्वेषामधिश्रयणान्ते प्रथमस्योद्वासनं चेत् क्रियते तस्य दाह एव स्यादिति प्रधानबाधात्तादृशस्थले ऽपि काण्डानुसमय एव ॥ मुष्टिकपालावदानेष्वपि काण्डानुसमय एव यथा एकस्य चतुरो मुष्टीन्निरुप्य परस्य निर्वपेत् ॥ नक्षत्रेष्ट्यादावग्नये स्वाहा कृत्तिकाभ्यः स्वाहेत्यादय उपहोमाः प्राकृता अरिष्टान् कृत्वैव कर्त्तव्या नतु ततः पूर्वम् प्रधानानन्तरम् प्रधानविधिवाक्यशेषेण प्रकृतिवद्विकृतिः कर्त्तव्येतिशब्देन प्रापितात्प्राकृतात् पश्चादेव वैकृतस्य प्राप्तेः॥ २ ॥

(इति पञ्चमाध्यायस्य द्वितीयः पादः ॥)

प्रकृतौ पञ्च प्रयाजास्त्रयोनुयाजाः पशौ त्वेकादश प्रयाजा एकादशानुयाजाः। तत्रैकादशत्वं प्रयाजादिस्वरूपे ऽनर्थकम्, न हि पञ्च त्रयो वैकादशीभवितुमर्हन्ति। अतस्तेषां प्र-

योगे इयं संख्या सुसम्पादिनी । तिस्र उपसदः प्रकृतौ विकृतौ तु षट् । तत्र संस्थानवृद्धैयवावृत्तिः, दण्डकलितवदावृत्तौ तु तृतीयां कृत्वा प्रथमायां क्रियमाणायां क्लृप्तक्रमभङ्गः स्यात् ॥ एकविंशतिमनुब्रूयादिति सामधेनीवृद्धावऽन्ते तु बादरायण इति न्यायेनाऽऽगन्तूनामन्ते सन्निवेश इति प्राप्तेऽपि या धाय्याशब्दिता ऋचः पृथुयाजवत्यौ धाय्येइत्याद्यास्तासामियं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्येत्यन्तरालत्वेन स्तुतत्त्वात्समिध्यमानसमिद्धवत्योरन्तराले निवेशः।अन्यासामागन्तूनामन्त एव । अत एव त्रैधातव्यामग्ने त्रीते वाजिनेत्येतस्यास्त्रिष्टुभो ऽन्ते निविशेन त्रिष्टुभा परिदधातीति दर्शनमुपपद्यते । द्वादशसु रात्रिष्वनुनीर्वपेदित्याधानात् पवमानहविषां विप्रकर्षे ऽपि तदन्त एवाग्निहोत्रादिप्रवृत्तिः । आधानवत्तासामग्न्यर्थत्त्वेन ततः प्रागाहवनीयाद्यसिद्धेः । तासां प्रधानाप्रङ्गत्वपक्षेऽपि साङ्गस्य प्रधानस्याननुष्ठितत्वान्न ततः पूर्वमग्निहोत्रारम्भः । काम्यानां नैमित्तिकानां वा क्रतूनां पाठक्रमादनुष्ठानं न किंतु कामनावशान्निमित्तवशाच्च तत्र क्रमः ॥३॥

(इति पञ्चमाध्यायस्य तृतीयः पादः ॥)

आश्विनग्रहस्तृतीयस्थाने पठ्यमानोऽप्याश्विनो दशमो गृह्यत इति श्रुतेर्दशम एव गृह्यते, श्रुतितः पाठस्य दुर्बलत्वात् । एवमर्थतो ऽपि पाठो दुर्बल इत्युक्तम् अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र । एवं प्रवृत्तिक्रमान्मुख्यक्रमो बलवानित्यप्युक्तं प्रागेव ॥ दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेतिवचनाद्यथेष्टिपूर्वत्वमाधानस्य एवं यदहरेवैनं श्रद्धोपनमेदथाऽऽदधीताथ यजेत सोमेन यक्ष्यमाणो नर्तून् सूर्क्ष्येन्न नक्षत्रं सोमेन यक्ष्यमाणोऽग्नीनादधीतेत्यादिवचनेभ्यः सोमेनानन्तरं यक्ष्यमाण इत्यपि गम्यते अतः सोमपूर्वत्वमपि । आग्नेयो वै ब्राह्मणो देवतया स

सोमेनेष्ट्वा ऽग्नीषोमीयो भवति यदेवादः पौर्णमासꣳ हविस्त-दनुनिर्वपेत्तर्हि स उभयदेवत्यो भवतीति हविर्मात्रमुत्कृष्यते न दर्श-पूर्णमासौ । यदेवादइति तन्मात्रस्यैवोत्कर्षाभिधानात् । तेन विप्र-स्यापि पुरो ऽग्निष्टोमादर्शपूर्णमासौ भवत एव । प्रकृतिवद्विकृतीनां द्व्यहकालता प्राप्ता य इष्ट्या पशुना सोमेन यजेत सो ऽमावा-स्यायां पौर्णमास्यां वा यजेतेतिप्रत्यक्षश्रुतिविहितः कालो न चोदकात्संकोचमर्हति । तेन सर्वाङ्गयुक्ता विकृतिः पञ्चदश्या-मेव भवति । नासोमयाजी सन्नयेदित्यऽसोमयाजिनः सा-न्नाय्याभावात्तद्विकारा अपि सोमादूर्ध्वमेव । एवमग्नीषोमीयवि-कारा अपीति ज्ञेयम् ॥ सोमविकारास्त्विष्ट्युत्तरमेव । नहि तेषां सोमवदिष्टेः प्राक् चोदना ऽस्ति प्रकृत्यारम्भमन्तरेण वि-कृतावनधिकारस्योक्तत्वात् ॥ ४ पादः ॥

इति भाट्टभाषाप्रकाशे पञ्चमो ऽध्यायः ॥

तदेवं विध्यर्थवादमन्त्रस्मृतिशिष्टाचारसामर्थ्याख्यानि षट् प्रमाणानि धर्मे निरूपितानि प्रथमे । द्वितीये शब्दान्तराभ्याससं-ख्यासंज्ञागुणप्रकरणान्तराणि षड् धर्मभेदे । श्रुतिलिङ्गवाक्यप्रक-रणस्थानसमाख्याख्यानि षट् शेषशेषिभावे तृतीये । तच्छेषभू-ता प्रयुक्तिश्चतुर्थे । श्रुत्यर्थपाठप्रवृत्तिस्थानमुख्याख्यैः षड्भिश्च क्रमोऽपि निरूपितः । अत्रैवं निरूपितेषु कर्मस्व ऽधिकारो निरूप्यते (प्यः) तदेवं प्रमाणभेदशेषप्रयुक्तिक्रमैर्निरूपिते धर्मे ऽधि-कारी निरूप्यते । तत्र स्वर्गाद्यर्थ एवाधिकारी । सो ऽपि स-र्वाङ्गसंपन्न एव न त्वन्धतिर्यगादिः । तत्रापि स्वर्गकाममुद्दिश्य विधीयमाने याग उद्देश्ये विशेषणं लिङ्गमविवक्षितमिति स्त्रि-या अप्यधिकारः । तत्रापि दम्पत्योः संसृष्टद्रव्यत्वाद्विभागप्र-तिषेधाच्च सहैवाधिकारः । तत्र पत्न्या अध्ययनाभावे ऽपि

यावदुक्तं मन्त्रोच्चारणम् । पुरुषेषु तु त्रयाणामपि वर्णानां वेदसंयोगादस्येव क्रतावधिकारः । रथकारस्य त्व ऽत्रैवर्णिकस्यापि ऋभुसौधन्वनापरपर्यायस्यावान्तरवर्णस्य ऋभूणां त्वेतिमन्त्रवर्णादस्येवाधानम्, रूढिबाधायोगात् त्रैवर्णिकेष्वेव रथकर्त्रेतिनियन्तुमशक्यत्वात् । ऐन्द्रं वास्तुमयं चरुं निर्वपेदिति प्रक्रम्य एतया निषादस्थपतिं याजयेदित्यत्रापि निषादानां त्रैवर्णिकस्य स्थपतेर्ग्रहणे षष्ठ्यर्थलक्षणापत्तेर्निषादश्चासौ स्थपतिरिति श्रौतार्थस्य त्यागायोगान्निषाद एव स्थपतिरधिक्रियते ॥ १ ॥

(इति षष्ठाध्याये प्रथमः पादः ॥)

ऋद्धिकामाः सत्रमासीरन्नित्यादौ क्रियां प्रत्युपादेयस्य कर्तुर्विशेषणं बहुत्वं विवक्षितम् । फलभोक्ता तु क्रियां प्रत्युद्देश्य इति तद्विशेषणं बहुत्वमविवक्षितम्, तेन न समुदायस्य भोक्तृत्वमपि तु प्रत्येकम् । तस्मात् प्रत्येकं कृत्स्नफलार्थिन एव सत्रेऽधियन्ते । एतेनैव दर्शपूर्णमासाभ्यां यजेतेत्यादावेकस्यैव कर्तृत्वमिति व्याख्यातम् ॥ उपक्रान्तं काम्यमिष्ट्यादिकर्म मध्ये कामनानिवृत्तावपि समापनीयमेव तैत्तिरीये देवताभ्यो वा एष आवृश्चते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत न देवताभ्य आवृश्चत इति तदऽसमापने दोषप्रायश्चित्तयोः श्रवणात् ॥ न कलञ्जं[१] भक्षयेदित्यादौ रागतः प्राप्तं कलञ्जादिभक्षणमनिष्टसाधनमिति निषिध्यते न तु नेक्षेतोद्यन्तमितिवत् पर्युदस्यते । अतो न तद्वर्जनात्फलोत्पत्तिरस्ति प्रजापतिव्रतवत् ॥ यावज्जीवमग्निहोत्रं जुहुयादित्यादौ न सन्ततानुष्ठानम् सायं प्रातरित्यनुपादेयगुणयोगात् । तथाच यदा कालः प्राप्तस्तदैव कर्मप्राप्तिः तत्कालविशिष्टजीवनाख्यनिमि-

(१) कालिञ्जशब्दः पुस्तकद्वयेऽपि ।

त्तस्य पुनःपुनरावृत्तावनुष्ठानमपि पुनःपुनरावर्त्तते। एवमन्तः क्रतावपि कपालभेदनादिनिमित्तावृत्तौ नैमित्तिकस्य स्कन्ने जुहोति भिन्ने जुहोतीत्यादेरावृत्तिर्ज्ञेया। एवं गुर्वभिवादाद्यप्यावर्त्तेत निमित्ततः॥ सोमेन यजेत स्वाध्यायमधीयीत प्रजामुत्पादयेदिति सोमविद्याप्रजं नित्यम्। जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवाञ्जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यृणश्रवणात् तदनपाकरणे च अनधीत्य द्विजो वेदाननुत्पाद्य सुतानपि। अनिष्ट्वा शक्तितो यज्ञैर्मोक्षमिच्छन् व्रजत्यध इति दोषस्मरणाच्च॥ २॥

(इति षष्ठाध्याये द्वितीयः पादः॥)

नित्येषु यथाशक्त्यऽङ्गानामुपसंहारः॥ काम्येषु तु सर्वाङ्गोपसंहारेणैव भाव्यम्॥ व्रीह्याद्यभावे तत्सादृश्यात्प्रतिनिधित्वेनोपात्तेष्वपि नीवारेषु न प्रधानकर्म भिद्यते। अतो मुख्याभावे प्रतिनिधिरुपादेयः॥ तत्रापि देवताया आहवनीयाद्यग्नेर्मन्त्रस्य प्रयाजप्रोक्षणादिकर्मणश्च प्रतिनिधिर्नास्ति, तत्तज्जन्यादृष्टस्याऽन्यतःसिद्धौ प्रमाणाभावात्॥ नीवारादिस्तु प्रत्यक्षेण पुरोडाशं साधयतीति युक्तस्तत्र श्रुतद्रव्यापचारे प्रतिनिधिः। अयज्ञिया वै माषा वरकाः कोद्रवा इत्यऽयज्ञियत्वेन प्रतिषिद्धानां माषादीनां मुद्गादिसादृश्येऽपि न मुद्गादिप्रतिनिधित्वम्॥ यजमानस्य प्रतिनिधिर्नास्त्येव॥ यत्र तु सप्तदशावरास्सत्रमासीरन्नित्यादौ सत्रे कस्यचिद्विनाशे (शस्तत्र) यद्यपि तत्कार्यकरणार्थमन्यः प्रतिनिधेय एव, तथापि नासौ फलभाक् पूर्वप्रवृत्तत्वाभावात्। कार्यमात्रं तु तेन साधयितुं शक्यम्। कर्त्रन्तःपातित्वाच्चास्य फलिसंस्कारा भवन्ति॥ खदिरव्रीह्यादिस्थाने कदरनीवारै(रादिभि)रुपक्रान्तेऽपि प्रयोगे मुख्यद्रव्यलाभे सति मुख्यमेवोपाददीत

(खादिरादिकं पशुनियोजनाद्यर्थमुपादद्यात् (ददीत [१]) कृते तु नियोजनादौ मुख्यं प्राप्तमपि नोपादद्यादित्यपि केचित् ॥ प्रधानमात्रनिर्वृत्तिपर्याप्तस्य मुख्यस्य लाभे शेषकर्मपर्याप्तोऽपि प्रतिनिधिर्नोपादेयः ॥ ३ ॥

(इति षष्ठाध्याये तृतीयः पादः ॥)

अवदाननाशे पुनरायतनादवदानमिति कल्पसूत्रकाराः मध्यात् पूर्वार्द्धाच्चावद्यतीति शास्त्रात्सकृन्मध्यादेरवत्ते पुनस्तद्भावान्नायतनान्न्यायतोऽवदानं प्राप्नोति किं तु हविरन्तरं सम्पादनीयम् । तच्च यस्य सर्वाणि हवींषि नश्येयुरपहरेयुर्वा आज्येनैता देवताः परिसंख्याय यजेतेति वचनादाज्यं भवति ॥ यस्योभयं हविरार्त्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदित्यत्रार्त्तिमुद्दिश्य पञ्चशरावो विहितः । आर्तिश्चाऽविशेषेण यत्किंचिद्विषयिणी सर्वदैवास्तीति सर्वदा पञ्चशरावः प्राप्तोस्तीति अनियतः शास्त्रार्थो मा भूदित्यगत्या हविरित्यनेन विशेष्यते। तावता च परिसमाप्ते वाक्ये उभयमित्यविवक्षितं ग्रहैकत्ववत् । वाक्यभेदप्रसङ्गात् । तेन न (च) सायंदोहार्त्तिरेव वा प्रातर्देहार्त्तिरेव वा न निमित्तम् किंतूभयमपि परस्परानपेक्षं निमित्तमिति वाक्यार्थः । एतच्च दर्शात्कर्मान्तरं न तु तत्प्रतिनिधिरिति पञ्चशरावं कृत्वा दर्शोप्यनुष्ठेय एव ॥ ४ ॥

(इति षष्ठाध्याये चतुर्थः पादः ॥)

यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्स त्रेधा तण्डुलान्विभजेद्ये मध्यमास्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं [२] ये ऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति । अत्र न तण्डुलानां

---

(१) टिप्पणीभूतमिदं पुस्तके मिश्रितमिति प्रतिभाति ।

(२) दध्नश्चरुमिति ख-पु. पा.

विभागो विधीयते मध्यमादिवाक्यप्राप्तत्वात्। नापि दधिशृतयोरधिकरणत्वम् अभ्युदयेष्टिप्रकरणे सह श्रपयतीतिवचनेन तस्यापि प्राप्तत्वात्। किं तु तण्डुलान्विभजेदित्यस्य तण्डुलोपलक्षितं हविस्त्रयं देवताभ्य उपनयेदित्येव। ततश्च न प्रकृतहानाऽप्रकृतप्रक्रिये प्रसज्येयातामिति नात्र प्रायश्चित्तरूपं कार्यं विधीयते। प्रकृतस्य च हविस्त्रयस्य अत्यक्तयागसम्बन्धस्य देवतान्तराकाङ्क्षायां मध्यमादिवाक्यान्युपतिष्ठन्ते। तत्र दात्रादिगुणविशिष्टमेकमग्न्यादिदेवताकारकमेकेन विधिना विधातुं शक्यम्। ततश्च यदि बिभियादभि मोदेष्यतीति महारात्रे[1] हवींषि निर्वपेत्फलीकृतैस्तण्डुलैरुपासीत अर्धं दधि हविरातञ्चनार्थं निदधाति अर्धं न यद्यभ्युदियात्तेनातञ्च्य प्रचरेत् यद्यु न प्रातरन्येद्युरेतेन ब्राह्मणं भोजयेदिति दर्शनमुपपद्यते। अन्यथा लौकिकयोरेव दधिशृतयोश्चरुद्वयसम्भवेन कालापराधदोषे ऽपहृते तदानीमेव दर्शः कर्त्तव्यः स्यात्। तत्रातञ्चनार्थं दध्यर्द्धस्थापनमनर्थकं स्यात्। अस्माकं तूपक्रान्तं प्रयोगं समाप्य श्वो दध्यन्तरमुत्पाद्यमिति तदर्थवद्भवतीति। यद्यपि चतुर्दश पूर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामितिलिङ्गोपोद्बलिता उपांशु पौर्णमास्यामिति पौर्णमासीमात्रग्रहणाद्दर्शे उपांशुयाजो नास्ति तथापि बह्वृचब्राह्मणे तद्दर्शनादभ्युदयेष्टौ उपांशुयाजहविषोपि देवतापनयेपि देवतान्तरयोगानुक्तेरुपांशुयाज एव लुप्यते। अनिरुप्ते निरुप्ते वा प्रायश्चित्तमिदं सममिति। इदम् अभ्युदयेष्ट्याख्यम्। निर्वापो वैकृतीभ्यः स्यादनिरुप्ते यदोदयः॥ चन्द्रस्येति शेषः। किंचिन्निरुप्ते शिष्टस्य तूष्णीं निर्वाप इष्यते। ज्योतिष्टोमे यदि बहिष्पवमानं प्रसर्पतां प्रतिहर्ता ऽपच्छिद्या[2]त्सर्ववेदसं दद्या-

---

(१) अभि नोदेष्यतीति महापात्रे -इत्यपि क्वचित्पाठः।

(२) अपच्छिद्येतेति पाठान्तरम्।

द्युद्गातापच्छिद्यादक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेतेत्यत्र युगपत्पद्द्वयोरपच्छेदे ऽन्यतरत्प्रायश्चित्तं कर्त्तव्यम्। अपच्छेदयोः पौर्वापर्ये तु पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्यथोत्पादान्नाद्याऽबाधेन सम्भव इति न्यायेनासंजातविरोध्यपि पूर्वं संजातविरोधिनापि निरवकाशेन परेण प्रायश्चित्तेन[1] बाध्यते। पश्चादुद्गात्रपच्छेदे सर्वस्वं स्यात्पुनः क्रतौ। आवृत्तिरह्नस्तस्यैवा ऽपच्छेदो ऽहर्गणे यदि ॥ ५ ॥

(इति षष्ठाध्याये पञ्चमः पादः ।)

सत्रेषु तुल्यकल्पानामेवाधिकारः। अन्यथा वासिष्ठानां प्रयाजो नाराशंस इतरेषां तनूनपादिति कल्पभेदेनान्यतरग्रहे इतरोननुगृहीतः स्यात्। राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र भिन्नकल्पयोरपि राजा च पुरोहितश्च तयोरधिकारः। अत्र समासान्तरोपादाने लक्षणापत्तेर्न द्वयो राज्ञोर्द्वौ पुरोहितौ वा एकस्य वा द्वौ पुरोहितावत्र ग्राह्यौ। आद्ये राजपदवैयर्थ्यात्। द्वितीये पुरोहितं वृणीत इत्युपादेयपुरोहितगतमेकत्वं विवक्षितमिति द्वयोः पुरोहितयोरसम्भवः। य एव कश्चित्स्तोमभागानधीयीत स एव वासिष्ठ इत्यवासिष्ठस्यापि स्तोमभागविदो ब्रह्मत्वाभ्यनुज्ञानाद्वासिष्ठो ब्रह्मेति वाक्यमनादृत्य वैश्वामित्रो होतेतिवचनाद्विश्वामित्रस्य तत्समानकल्पानां च सत्रेधिकारः। ते (ये) सर्वे साग्निकास्तेषां सत्रं साधारणं मतम् ॥ ६ ॥

(इति षष्ठाध्याये षष्ठः पादः ॥)

स्वदाने देयमात्मीयं न भूमिर्न तुरङ्गमः। नासत्संपाद्य दातव्यं न शुश्रूषुश्च शूद्रकः। पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः पञ्चपञ्चाशतः सप्तदशाः पञ्चपञ्चाशत

(१) निरवकाशो न परेण बाध्यते प्रायश्चित्तेन बाध्यत इति ख-पुस्तके पाठः।

एकविंशाः विश्वसृजामयनं सहस्रसंवत्सरमित्यत्र विश्वसृजां सत्रे संवत्सरशब्दो न कालवाची किं तु त्रिवृदादिपदैः स्तोमविशिष्टमऽहरुच्यते । नाहःसंघ, स्ततोऽहस्सु गौणी संवत्सराभिधा ॥ ये त्वत्र सहस्रायुषां गन्धर्वाणां वा रसायनसिद्धानां वा नृणां वा कुलं कल्पो वा मासेषु वा संवत्सरत्वं द्वादशरात्रिषु वा संवत्सरशब्द इति विकल्पा दर्शितास्ते सर्वेप्युक्तिमात्रनिरास्याः । चतुर्विंशतिपरमाः सत्रमासीरन्निति नियमान्नार्द्धतृतीयैर्यजमानशतैरप्यनुष्ठेयमिति ज्ञेयम् ॥ ७ ॥

(इति षष्ठाध्याये सप्तमः पादः ॥)

चतुर्होतृहोम उपनयनाहुतिः स्थपतीष्टिरवकीर्णिपशुश्चेत्यादिकं लौकिकेऽग्नावेव, न तदर्थमाधानसिद्ध आहवनीयोऽपेक्ष्यते ॥ अग्नीषोमीयं पशुमालभेतेत्यत्र पशुशू छागस्य वपाया मेदस इति मन्त्रवर्णाच्छाग एव ग्राह्यः ॥ ८ पादः ॥

इति भाट्टभाषाप्रकाशे षष्ठोऽध्यायः ॥ ६ ॥

निरूपित उपदेशः अतिदेश इदानीं निरूप्यते । तत्र दर्शपूर्णमासयोर्ज्योतिष्टोमे च प्रयाजादयो दीक्षणीयादयश्च धर्माः श्रूयन्ते। ते न केवलं यज्यर्थाः येन सर्वत्र यजेरेकत्वात्परिप्लवेरन्। अपि तु प्रधानभूतापूर्वप्रयुक्ताः । अपूर्वभावना च सर्वत्र भिद्यते । अतस्तत्तत्प्रकरणव्यवस्थिताः सन्तोऽन्यत्रातिदेशेनैव गच्छन्ति । स चातिदेशस्त्रिविधः प्रत्यक्षवचनान्नामधेयाच्चोदनालिङ्गानुमितवचनाच्च । आद्यं यथा इषावेकाहे ज्योतिष्टोमविकारे इषुविष्टुतिं करोतीत्यादिनापि चोदकप्राप्तानां विष्टुत्यादीनां विकारं विधाय समानमितरच्छ्येनेनेति इतरत्, लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यादिकं श्येनाङ्गजातमतिदिश्यते

वचनेन। एतद्ब्राह्मणान्येव पञ्च हवींषीति वैश्वदेवपर्वणि यद्ब्राह्मणम् तदेव वरुणप्रघासेष्वतिदिश्यते । तेन तत्रापि वार्त्रघ्नान्येतानि हवींषीत्याद्याः स्तुतयो नव प्रयाजा इत्यादयो विधयश्चाप्युपतिष्ठन्ते ॥ १ ॥

(इति सप्तमाध्याये प्रथमः पादः ॥)

गीतिषु सामाख्येत्युक्तम्। कवतीषु रथन्तरं गायतीत्यादौ अभि त्वा शूर नोनुम इत्यस्यामृचि या गीतिः सा कवतीष्वतिदिश्यते। गीतिविशिष्टाया ऋचः सामशब्दार्थत्वे तन्न संभवेदेवेति गीतमात्रं सामेत्यत्रोपपादितम् ॥ २ ॥

(इति सप्तमाध्याये द्वितीयः पादः ॥)

कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीत्यत्राऽपूर्वं कर्म विधीयत इत्युक्तम् । तत्र नैयमिकाग्निहोत्रवाचिशब्दप्रयोगस्तद्धर्मानतिदिशति । गुणयोगमन्तरेणान्यशब्दस्यान्यत्र प्रयोगादर्शनात्। एवं वरुणप्रघासेषु वारुण्या निष्कासेन तुषैश्चावभृथं यन्तीत्यत्रापि कर्मान्तरे सौमिकावभृथशब्दस्तद्धर्मातिदेशार्थ इति नामातिदेशोयम् ॥ ३ ॥

(इति सप्तमाध्याये तृतीयः पादः ।)

सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यत्रास्ति विध्यन्तापेक्षा। नचासावत्र श्रूयत इत्यनुमीयते नूनमयमन्यतःसिद्धामितिकर्त्तव्यतामुपजीव्य फलं साधयतीति। सा च वैदिकत्वसामान्याद्वैदिक्येवोपतिष्ठते न लौकिकी।अतः प्रकृतिवद्विकृतिः कर्तव्येति तत्राप्यानुमानिकाद्वाक्यान्नामातिदेशो बलवाञ्श्रौतत्वात्। तेन गवामयने ज्योतिर्गौऽरायुरित्याद्येकाहसंज्ञावन्ति कर्माणि गणान्तःपातित्वेपि न द्वादशाहधर्माँल्लभन्ते ऽपि तु नाम्नो बलवत्त्वात्तद्धर्मानेव ॥ ४ ॥

(इति चतुर्थः पादः ॥)

इति भाट्टभाषाप्रकाशे सप्तमोऽध्यायः ॥ ७ ॥

अथ विशेषतोतिदेशो निरूप्यते । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादिष्विष्टिषु निर्वपतिस्तद्धितेन देवतानिर्देश एकदेवत्वमौषधद्रव्यकत्वमित्यादिसामान्यादाग्नेयस्य विध्यन्त उपतिष्ठते। तेन यथाग्नेयेन स्वर्गः कृतस्तथा सौर्येण ब्रह्मवर्चसमिति कथंभावपूरणं सिद्धम् । एवमनेकदेवतेषु अग्नीषोमीयस्यैन्द्राग्नस्य वा ऽक्षरसंख्यासामान्याद्विध्यन्तो ज्ञेयः । ऐन्द्रपुरोडाशे देवतासामान्यात्सान्नाय्यधर्मप्राप्तावपि हविषो यागं प्रति देवतापेक्षया प्रत्यासन्नत्वेन बलीयस्त्वात्पुरोडाशधर्मा एव। कृष्णलचरौ औषधवाचिचरुशब्दप्रयोगात्तद्धर्मा एव । अव्यक्तचोदनासु सोमेन यजेतेतिवत् ताद्धितचतुर्थीमन्त्रवर्णैः स्पष्टं यागार्थत्वेन श्रुतदेवतासु विश्वजिता यजेतेत्यादिषु सौमिको विध्यन्तः ॥ १ ॥

(इत्यऽष्टमाऽध्याये प्रथमः पादः ॥)

आज्यद्रव्यकेषूपांशुयाजस्य पयोदध्यामिक्षादिषु सान्नाय्यस्य एवं दैक्षे चाग्नीषोमीयपशौ तु कठिनत्वसामान्याद्देवतैक्याच्चाग्नीषोमीयपुरोडाशविध्यन्तः प्राप्तोपि देवतासामान्यापेक्षया हविषो बलीयस्त्वात्पशुप्रभवत्वसामान्यात्सान्नायविध्यन्तः। तत्रापि साक्षात्पशुप्रभवत्वेन गतिमत्त्वेन च पय एव घनीभूतमामिक्षेत्युक्तम्। अतस्तत्र पयोधर्मा एव प्रवर्त्तन्ते। पश्वन्तरेषु त्वग्नीषोमीयपशोरेव विध्यन्तः । आलम्भविशसनादिसामान्यात्। द्विविधो द्वादशाहः सत्रमहीनश्च। अहर्गणा अपि तादृशा एव। अतः सत्रेषु सत्रात्मनो द्वादशाहस्य विध्यन्तः अहीनेष्वहीनात्मन इति व्यवस्था ॥ २ ॥

(इत्यष्टमाऽध्याये द्वितीयः पादः ॥)

आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन् सारस्वतं चरुं बार्हस्पत्यं चरुमित्यादौ स्थानसामान्यापेक्षया देवतासामान्यं प्रत्यासन्नमिति प्रथमेपि तृतीयस्याग्नीषोमीयस्य विध्यन्तः चरमेपि

चरमेपि प्रथमस्याग्नेयस्य ॥ ३ ॥

(इति तृतीयः पादः ।)

जुहोत्युत्पन्नानामग्निहोत्रादीनां दर्विहोमा इति नाम । ते त्वपूर्वा न कुतश्चिद्धर्मान् गृह्णीयुः ॥४॥

(इति चतुर्थः पादः ॥)

इति भाट्टभाषाप्रकाशे ऽष्टमोध्यायः ॥ ८ ॥

अपूर्वप्रयुक्ता धर्मा इत्युक्तं सप्तमाद्ये । ते च त्रिविधा वाक्यसंयुक्ता लिङ्गसंयुक्ताः श्रुतिसंयुक्ताश्च । तत्र प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति प्रोक्षिताभ्यां पिनष्टीत्यादौ प्रोक्षणस्य हन्तिपिनष्टिस्वरूपे आनर्थक्याद्वाक्येनाऽपूर्वार्थत्वं प्रोक्षणादेः । अगन्म सुवः सुवरगन्म, अग्नेरहमुज्जितिमनूज्जेषमित्येतौ मन्त्रौ क्रत्वङ्गत्वान्नह्यऽपूर्वमुलङ्घ्य श्रूयमाणफलदेवतार्थत्वं भजतो ऽपि तु क्रत्वपूर्वप्रयुक्तमेव फलदेवतं प्रकाशयत इति सेयमतिदेशेनापूर्वार्थता मन्त्रयोः[1] । व्रीहीन् प्रोक्षतीत्यत्र व्रीहिरूपद्रव्यं त्रीन् परिधीनित्यत्र त्रित्वसंख्या सूर्पेण जुहोति तेन ह्यन्नं क्रियत इत्यत्रान्नकरणकक्रियारूपो हेतुः । चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रामावास्यामित्यत्र पौर्णमास्याद्याख्यौ समुदायौ । न च प्रोक्षणं मन्त्रसूर्पचतुर्होत्रादीनां स्वरूपेण प्रयोजकम् । आनर्थक्यात् । यत्स्वीयमऽपूर्वसाधनीभूतं हवीरूपत्वम् तत् स्वपेण । तच्च नीवारादिष्वपि अविशिष्टम् । अतस्तेष्वपि प्रोक्षणादीनां प्राप्तिरस्तीति व्रीहिश्रुतिमनादृत्यैवापूर्वार्थता प्रोक्षणादेः । एवं धर्माणामपूर्वार्थत्वे सिद्धे विकृतिष्वप्युलूखलादीनां प्रोक्षणम् । अगन्म ब्रह्मवर्चसं,

(१) अगन्मुखः सुवरगन्म अग्नेरहमुज्जिति मनुजेषमित्यतौ मन्त्रौ क्रत्वंगत्वात्राचदपूर्वमुल्लङ्घ्य श्रुतमातफलदेवतार्थत्वं भजतोऽपितु क्रत्वपूर्वप्रयुक्तमेव फलदेवतं प्रकाशयत इति। सेयं तिगेनापूर्वार्थत्रामन्त्रयो"रितिकपुस्तकपाठः, ख-पुस्तके त्वत्र नास्त्यत्र. सन्दि अष्टमाध्यायारम्भात्प्रभृति तदीयतृतीयपादारम्भं यावत् त्रुटितमत्र ।

सूर्यस्याहमुज्जितिमित्यूहेन मन्त्रो नीवारेषु प्रोक्षणमद्गिपरिधिकेष्वूहेन मन्त्रो विनाप्यन्नकरणं सूर्पस्य होमसाधनत्वं विनापि स मुदायं चतुर्होत्राभिमर्शनं च सिद्ध्यति। ततश्च मन्त्रसामसंस्काराणां द्वारान्तरसंबन्धनिमित्तान्यथाभावलक्षण ऊहश्चिन्तनीय इति सिद्धम्। प्र वो वाजा इत्याद्येकादशर्चः पठितः। त्रिः प्रथमां त्रिरुत्तमामन्वाह ततः पञ्चदश संपद्यन्त इत्यत्र त्रिरभ्यासः प्राथम्यधर्म इति या काचित् प्रथमे स्थाने पठ्यते सा सर्वापि त्रिरभ्यसनीया। प्रवोवाजीया तु लक्षणयोपस्थितेति नायमत्र धर्मः। तेन यत्र कुत्रापि या प्रथमा सा ऽभ्यसनीया। दर्शपूर्णमासावारभ्य प्राणोन्वारम्भणीयां कुर्यादित्यत्र दर्शपूर्णमासयोरप्रवृत्तस्य या प्रथमं प्रवृत्तिः सा आरम्भः। नवसो (न च सः) द्वितीयादिप्रयोगे प्रवृत्तिस्तुप्रवृत्तस्यैवाभ्यास इत्युच्यते नत्वसावारम्भ इति प्रथमप्रयोगात्यागेनान्वारम्भणीया न प्रतिप्रयोगम्। दर्शपूर्णमासयोरग्नये जुष्टं निर्वपामीति मन्त्रः। सौर्ये तु चरौ अग्निपदस्थाने सूर्यायेति पदं प्रयोज्यम्। एवं धान्यमसि धिनुहि देवानित्यत्र धान्यपदस्थाने यत्र तरस-मयाः पुरोडाशा भवन्ति शाक्यानामयने तत्र मांसमसीत्यूहः। ये च यज्ञपतिं वर्द्धानित्यत्र यच्छब्दार्थस्य प्राधान्याद्बहुकर्तृके यज्ञपतिपदप्राधान्यार्थं नोहमर्हति। आशास्ते यं यजमान इत्यादौ तु तस्यैव प्राधान्याद्बहुकर्तृकेष्वूहः आशासत इमे यजमाना इति। यज्ञायज्ञीये श्रूयते न गिरा गिरेति ब्रूयादैरं कृत्वोद्गेयमिति श्रुत्यैव गिरापदस्थाने इरापदं प्रक्षिप्यते। तदपि प्रगीतमेव प्रयोक्तव्यं स्थानधर्मत्वात् ॥ १ ॥

(इति नवमाध्याये प्रथमः पादः ॥)

यत्र तु नैवारं चरुं निर्वपेदिति प्रत्यक्षा चोदना तत्रापि व्रीहिस्थानापन्ना नीवारा व्रीहिधर्माँल्लभन्ते ॥ २ ॥

(इति नवमाध्याये द्वितीयः पादः ॥)

तेन व्रीहीणां मेध सुमनस्यमान इत्यादौ नीवाराणां मेध इत्यूहः सिद्धः। अग्नीषोमीये पशौ अदितिः पाशं प्रमुमोक्त्वेतमित्येकवचनान्तो मन्त्रः पठ्यते। अपरस्तु आदितिः पाशान् प्रमुमोक्त्वेतानिति बहुवचनान्तोपि तत्रैव पठ्यते। सोपि गुणे त्वन्याय्यकल्पनेतिन्यायेन बहुवचनस्यापि पशाववयवाभिप्रायेण योजयितुं शक्यत्वात् तत्रैवावतिष्ठते न तु बहुपशुकेषूत्कृष्यते। तथा द्विबहुपत्नीकेपि यजमाने पत्नीं संनह्येत्यस्य नोहः। अविशिष्टस्याम्नानस्यैकपत्नीकप्रयोगविषये संकोचयितुमशक्यत्वात्। अत एवैकवचनस्य निर्देशमात्रार्थत्वेनादृष्टार्थत्वान्न बहुपत्नीकस्य विकृतावप्यूहः। प्रतिनिधौ चाऽविकारात्। यत्र व्रीह्यादयः प्रतिनिधित्वेनोपादीयन्ते तत्राऽविकारेणैव मन्त्रः प्रयोज्यः ॥ ३ ॥

(इति नवमाध्याये तृतीयः पादः ॥)

अभ्युदयेष्टौ दध्नश्चरुमिति पर्येति चरुमिति च दधिशृतयोः सप्तमीनिर्देशात्प्रणीताकार्ये विनियोग इति मन्यमानस्योत्तरं कर्मान्तरपक्षे तथास्तु। प्राकृतानामेव तेषां पूर्वाभ्यो देवताभ्योपनयमात्रं विधीयत इत्युक्तं षष्ठे। तेन तत्र प्रदेशधर्मा एव प्रवर्त्तन्त इति। अश्वमेधे ईशानाय पयस्वत आलभेतेति यागं विधाय पर्यग्निकृतानारण्यानुत्सृजतीति पर्यग्निकरणान्ताङ्गरीतिर्विधीयते। तथा च प्रत्यक्षविहितया निराकाङ्क्ष ईशानप्रयोगवचनो न चोदकमपेक्षते ॥ ४ ॥

(इति चतुर्थः पादः ॥)

इति भाट्टभाषाप्रकाशे नवमोऽध्यायः ॥ ९ ॥

उपकारपृष्ठभावेन पदार्थानां प्राप्तिरिति स्वयंदितं बर्हिर्भवतीत्यादौ लवनादयस्तत्साधनभूता मन्त्राः परश्वादयश्चातिदेशात्प्राप्ता अपि बाध्यन्ते। एवं प्राजापत्यं घृते चरुं निर्वपेच्छृतेकृ-

ष्णलमायुष्काम इत्यत्रापि वैतुष्यलक्षणोपकाराभावात् कृष्णलेषु नावघातः। सोमे दीक्षणीयाद्यर्थं राजसूयेनुमतीष्ट्याद्यर्थं स्वार्थं च नारम्भणीयापेक्ष्यते। दर्शपूर्णमासावारप्स्यमान इति वचनादन्यत्र तदप्रवृत्तेः। खलेवाली यूपो भवतीत्यादौ सिद्धायां खलेवाल्यां यूपमाच्छेत्स्यता होतव्यमिति च्छेदनार्था आहुतिर्लुप्यते। छेदनाभावे द्वारलोपात्। अच्छेत्यस्याभिमुखमित्यर्थः(?) (आच्छेत्स्यता च्छेत्तुमभिमुखेनेत्यर्थः)। उत्तमे प्रयाजे वक्ष्यमाणप्रधानदेवतास्मारकाणामाग्निं स्वाहा विष्णुं स्वाहेत्यादीनाम् अग्न्यादिपदानां सौर्यादिषु विकृतिषु निवृत्तिर्लुप्तार्थत्वात्। ज्योतिष्टोमेग्नीषोमीयपशुधर्मसंदंशे अग्नीषोमीयं पशुपुरोडाशं निर्वपतीत्ययं पुरोडाशोग्नीषोमीयपश्वङ्गं सत् तद्गतदेवतासंस्कारेणाऽदृष्टेनैव द्वारेणोपकुर्वन्नदृष्टार्थ इत्यन्यदेवत्येऽपि पशौ निवर्त्तते। सौर्ये चरौ चरुशब्दो याज्ञिकप्रसिद्ध्या ऽनवस्रावितान्तरूष्मपक्व ओदने वर्त्तते। आदित्यः प्रायणीयश्चरुरित्युक्त्वाऽदितिमोदनेनेति वेदेप्यनुवादात्। तेन चरुमुपदधातीतिस्थाल्यां चरुशब्दो गौणः चरुरोदनभेदः स्यात् स्थाल्यामेव स पच्यते तस्मिन् पेषः संयवनं संवापस्तापनमित्यादीनां लोपः॥ १ ॥

(इति दशमाध्याये प्रथमः पादः)

कृष्णलचरौ घृते श्रपयतीतिवचनात्पाकः कर्त्तव्यः। स च रूपरसपरावृत्तिलक्षणस्य श्रपणस्य मुख्यस्य तत्रासम्भवादुष्णीकरणमात्रम्। पुरोडाशानां स्रुच्यसंसर्गार्थे उपस्तरणाभिघारणे कृष्णलेषु तत्संसर्गासम्भवाल्लुप्येते। चतुरवत्तं जुहोतीत्यप्युपस्तरणाभिघारणद्व्यवदानप्राप्तचतुःसंख्यानुवादेनावत्तहोममात्रं विधीयते इति चतुष्ट्वस्याविवक्षितत्वान्न तत्प्रापकम्। चुश्चुषाकारं भक्षयन्तीतिवचनात्पाकवत्कृष्णलानां भक्षणमपि गौणं चुश्चुषाकारं विधीयते। ऋत्विग्भ्यो दक्षिणां दद्यादिति दानं दृष्टार्थत्वा-

दानमनार्थं तेषां भृतिरेव । हविःशेषदानं तु न तथा । दत्तस्य दानायोगेन प्रतिपत्तिमात्रत्वात्तस्य । आनतिरूपकार्याभावादेव सत्रेष्वृत्विग्वरणं दक्षिणा च नास्ति । मृतेज्यायामायुराशास्त इत्यादीनां लोपः । अङ्गीकृतमरणस्य स्वर्गकामस्य विहिते सर्वस्वारनाम्नि एकाहे आर्भवस्तोत्रकाले ब्राह्मणाः समापयत मे यज्ञमिति प्रैषमृत्विग्भ्यो दत्त्वा यजमानो म्रियते तत्रापि श्रौतप्रैषबलात् प्राग्भृतैरेव ऋत्विग्भिः क्रतुसमापनं कर्त्तव्यम् । यथोक्तम् यजमानस्य मरणे नार्थिन इज्यां प्रवर्त्तयन्तीति तत्राप्यार्भवात्प्राक् आयुराशास्त इत्याद्यस्ति । हिरण्यमात्रेयाय ददातीत्यादिकं तु सत्रेपि भवत्येव । आधाने पवमानेष्टौ अतिदेशादग्निहोत्रहवण्या हवींषि निर्वपन्तीतिप्राप्ताया अग्निहोत्रहवण्या अग्निहोत्रस्यानारम्भात्तद्धवनसाधनत्वाभावेपि तस्या यज्ञैः केतुभिः सहेति तदर्थं प्रागेव परिकल्पितत्वात् विगुणयापि तयैव निर्वापः कर्त्तव्यः । द्यावापृथिवीभ्यां धेनुमालभेत वायव्यं वत्समैन्द्रमृषभमिति धेन्वादिशब्दानां गोजातीये रूढत्वाच्च छागस्य वपाया इतिलिङ्गप्राप्तस्य निवृत्तिः । वायव्यं श्वेतमालभेतेत्यादौ साधारणैः श्वेतादिगुणैस्तु न तस्य निवृत्तिः । पितृभ्यो ऽग्निष्वात्तेभ्यो भिवान्यायै दुग्धे मन्थमिति श्रुते मन्थे पूर्वं श्रपणं पश्चात्पेषणम् प्रकृतौ तद्विपरीतम् ततः पदार्थधर्मस्य क्रमस्य बाधेपि न प्राकृतः पदार्थो निवर्त्तेत इति मन्थेऽपि प्राकृतमेव पेषणम् ॥ २ ॥

(इति दशमाध्याये द्वितीयः पादः ॥)

पुनराधेये पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वास इत्यादिदक्षिणा एका देयेत्येवमादिकाया अग्न्याधेयदक्षिणाया निवर्तिका वैकृत्यैवानतेः सिद्धत्वात् । उभयीर्ददातीति तु न समुच्चयविधायकम् अग्न्याधेयिकीः पुनराधेयिकीश्च ददातीत्युभयापेक्षा तत्प्रवृत्तेः । पाकाभिघारणादयोन्वाहार्यधर्मा वत्सवद्वास आदौ न प्रवर्त्तन्ते

स्वरूपनाशाच्च स्वादिमादिप्रयोजनाभावाच्च । गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेत्यत्र तस्येति पदं वाक्यावगतं गवादि सत्त्का प्रकृतं क्रतुं न ब्रूते वाक्यात्प्रकरणस्य दुर्बलत्वात् प्रकृतत्वेनैव तत्प्राप्तेस्तत्पदस्यानर्थक्यापाताच्च। नाप्यजादीन्, तेषां बहुवचनेन निर्देशात्। नाप्यश्वादीन्, अमुख्यत्वात्तेषाम्। तस्मान्मुख्यत्वादसन्तमुपकारकत्वाच्च गोरेव निर्देशः । तेनायमर्थः । गवादिद्रव्याणि तस्याः गोर्द्वादशशतं दक्षिणेति। तस्माद्गवामेषा संख्या। सा च दक्षिणा विभज्य देया विभागश्च द्वादशाहे दीक्षाक्रमवाक्ये अर्द्धिनो दीक्षयन्ति तृतीयिनो दीक्षयन्ति पादिनो दीक्षयन्तीतिसमाख्याबलात्। स चेत्थम्—कृत्स्नं द्रव्यं पञ्चविंशतिधा विभज्य मुख्येभ्यश्चतुर्भ्यो द्वादश भागान् अर्द्धिभ्यः षट् तृतीयिभ्यश्चतुरः पादिभ्यस्त्रीनिति विभज्य दद्यात्। मुख्याद्याश्च लब्धं द्रव्यं साम्येन विभज्य गृह्णीयुरिति। अश्वादीनां त्वऽनिवृत्तिरेव। अस्याः प्रकृतां गोसंख्याया निवृत्तिः । नैमित्तिक्या यदि सोममपहरेयुरेकां गां दक्षिणां दद्यात् अभिग्धे [१]सोमे पञ्च गा दद्यादिति च ॥ ३ ॥

(इति दशमाध्याये तृतीयः पादः ॥)

नक्षत्रेष्टौ अग्नये स्वाहा कृत्तिकाभ्यः स्वाहेत्यादय उपहोमा न प्राकृतानां नारिष्ठानां कार्ये विहिता इति न तान्बाधन्ते । ततस्तत्रोभयेषां होमानां समुच्चयः। शरमयं बर्हिर्भवतीति तु बर्हिःशब्दलक्षिते कुशकार्ये विहिताः शराः कुशान्बाधते। विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना। आग्नेयोष्टाकपाल इत्यादौ यो विध्युद्देशे देवतावाची शब्दः स एवाग्निमावहेत्यावाहनादिष्वपि प्रयोज्यो न तु तत्पर्यायः मन्त्रैरेव मन्त्रार्थः स्मर्त्तव्य इतिवदयं नियमः । एवं विकृतौ सूर्यादिपदमेव निगमेषु प्रयोज्यं नत्वादित्यादिपदम्। अग्नये

(१) भभिदग्ध इति ख-पु. पा.।

पावकायेत्यादौ तु पदद्वयमपि निगमेषु प्रयोज्यम् अन्यतरेण पदेनेतरगुणास्योपस्थित्ययोगात् । पृषदाज्येनानुयाजान्यजतीति न पृषदाज्यमिति द्रव्यान्तरं पृषच्च तदाज्यं चेतिव्युत्पत्त्या तस्य शब्दस्य चित्रत्वविशिष्टाज्यवाचित्वात् । ततश्च यथा जुषन्तां युज्यं पय इति पयस्यां पयःशब्दो वक्ति तस्यास्तदनन्यत्वादेवमाज्यशब्दोपि पृषदाज्यमिति । ततः देवानाज्यपानावहेत्यादिष्वाज्यपयुक्तेषु निगमेषु आज्यपशब्देन प्रयाजानुयाजा गृह्यन्त इति न केवलानुयाजनिमित्ते पृषदाज्यपानितिमन्त्रो विक्रियते ॥ ४ ॥

(इति दशमाध्याये चतुर्थः पादः)

यत्र द्यावापृथिव्य एककपालो वैष्णवस्त्रिकपाल एकां सामिधेनीमित्यादौ प्रथमोपस्थितस्य त्यागे कारणाभावादादित एकेन त्रिभिर्वा मन्त्रैः कपालान्युपदध्यादन्ये लुप्यन्ते प्रयोजनाभावात् । एवं सामिधेन्या अप्याद्याया एवोपादानम् । यत्र सामिधेनीविवृद्धिरेकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति तत्र प्राकृतीभ्यः पञ्चदशभ्यो ऽन्या याःकाश्चिदग्निसमिन्धनप्रकाशिका ऋच आनेतव्याः ॥ ५ ॥

(इति दशमाध्याये पञ्चमः पादः ॥)

सत्रेष्वतिदेशादन्येष्टत्विक्षु प्राप्तेषु ये यजमानास्त ऋत्विज इति यजमाना एव ऋत्विक्कार्ये विधीयन्त इत्यृत्विजां निवृत्तिः । अध्येतृप्रसिद्ध्या द्वादशाहे सत्त्रशब्दस्तत्रासनोपायिचोदितत्वं बहुयजमानत्वं चास्तीत्यस्य सत्रवद् यजतिचोदनाचोदितत्वमप्यस्तीति द्विरात्रादिवदहीनत्वमप्यस्ति ॥६॥

(इति दशमाध्याये षष्ठः पादः ॥)

अग्नीषोमीयं पशुमालभेतेत्यत्र न कृत्स्नस्य पशोर्हविष्ट्वमवदानस्य प्रकृतौ हविःसंस्कारार्थत्वेन दृष्टत्वाद्यतोवदानं तद्ध-

विरिति नियमात् । अवदानं च हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्यादिवाक्ये हृदयादीनामेवावगम्यत इति तेषामेव हविष्ट्वम् । एकादश पशोरवदानानि तानि द्विर्द्विरवद्यतीति संख्याविधानादेकादशभ्य एव परिगणितेभ्यो हृदयादिभ्यो ऽवदानं नाधिकेभ्यः । चातुर्मास्येषु साकमेधीयान्तर्गतायां गृहमेधीयायामाज्यभागौ यजतीतिचोदकप्राप्ताङ्गानां निवृत्त्यर्थमिति न,परिसंख्यायां दोषत्रयापत्तेः। यावच्छ्रुतेतिकर्तव्यतया निराकाङ्क्षा गृहमेधीया न चोदकमाकाङ्क्षते(ति)। तस्मान्न प्राकृतमङ्गं निर्गुणं श्रुतम्। तत्रापूर्वत्वमितिनियमादपूर्वैव गृहमेधीया।तत्रैव स्विष्टकृदिडादिकमपि प्रत्यक्षश्रुतत्वाविशेषात्कर्त्तव्यमेव । प्रत्यक्षश्रुता द्रव्यदेवतादयश्चोदकप्राप्तांस्तान्बाधन्ते। अत एव प्राकृतः खादिरो यूपो भवतीति श्रुतं खादिरत्वमौदुम्बरो यूपो भवतीति श्रुतौदुम्बरतया बाध्यते विकृतौ । तथा सौमारौद्रं चरुं निर्वपेच्छुक्लानां व्रीहीणाम् नैर्ऋतं चरुं निर्वपेत्कृष्णानां व्रीहीणामित्यादावपि द्रव्यगुणविशिष्टकर्मविधानादुपदिष्टा व्रीहयो यवान्बाधेरन् । यद्यपि चतुरवत्ती यजमानः स्यादथ पञ्चावत्तैव वपेत्यत्रावदानोद्देशेन पञ्चसंख्या विधीयते। न चोद्देश्यमवदानं वपां विशेष्टुं शक्नोतीति वपाग्रहणं सर्वेषामवदानानामुपलक्षणम्। ततो हविष्षु ऽप्यऽवदानप्राप्तौ द्विर्द्विरऽवद्यतीति वाक्यमर्थवद्भवति। पञ्चत्वं चोपस्तरणस्याभिघारणस्य वा वृद्ध्या संपादनीयम् ॥७॥

(इति दशमाध्याये सप्तमः पादः ॥)

पिञ्येष्टौ नार्षेयं वृणीते न होतारम् । अनारभ्य च श्रूयते यजतिषु ये-यजामहं करोति नानुयाजेष्वित्यादौ चोदकप्राप्तवरणादेर्निषेधे ग्रहणाग्रहणवद्विकल्पः स्यात् ततश्च पक्षे शास्त्रस्य मिथ्यात्वकल्पनापेक्षया वरं लक्षणया पर्युदासाश्रयणम् । न च नानुयाजेष्विति समासापत्तिः । महाविभाषया राज्ञः पु-

रुष इत्यादाविव पक्षे समासाभावेप्यऽदोषात्। तदयं वाक्यार्थः। पित्र्यायामार्षेयवरणव्यतिरिक्तं प्रकृतिवत्कुर्यादिति अनुयाजव्यतिरिक्तेषु यजतिषु ये-यजामहं कुर्यादिति च। तस्मान्नात्र विकल्पः किंत्वनुष्ठानमेव। तदयं प्रतिषेधाद्बाधः। शरैः कुशानां प्रत्याम्नानाद्बाधः। स्वयंचोदितेर्थलोपाद्बाध इति त्रेधा बाधः सिद्धः। न तौ पशौ करोति न सोमे इत्यत्र उपदेशतोतिदेशतो वा यथा सोम आज्यभागौ न स्त एवं पशावपि न स्त इति दृष्टान्तमुखेन प्रतिषेधोयम्। तस्मात्पशावाज्यभागयोर्विकल्पः। अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्यादौ त्वगत्या वाक्ययोस्तुल्यबलत्वादितरेण बाधायोगाद्विकल्पः। जर्तिलयवाग्वा जुहुयात् गवेधुकयवाग्वा जुहुयात् अनाहुतिर्वै जर्तिलाश्च गवेधुकाश्च पयसाग्निहोत्रं जुहुयादित्यत्राऽनाहुतिरिति न जर्तिलादेः प्रतिषेधः वाक्यभेदात्। अतः पयसः स्तुतिमात्रमेतत्। एवमभिघार्यास्त्रैयम्बका नाभिघार्याः होतव्यमग्निहोत्रं न होतव्यमग्निहोत्रमिति नञ्वद्वाक्यम् अभिघार्या एव तूष्णीमेव होतव्यमित्यनयोरर्थवादः। यदभिघारयेद्रुद्राय संनिदध्यात् यजू जुहुयात् अयथापूर्वमाहुतीर्जुहुयादित्युक्तदोषमङ्गीकृत्यापि कर्त्तव्यमभिघारणमतिप्रशस्तत्वादिति। दीक्षितो न ददाति न जुहोति न पचतीत्यादिः पुरुषार्थानामव दानादीनां प्रतिषेधो न क्रत्वर्थानाम्, विकल्पापत्तेः। आहवनीये जुहोतीतिसामान्यशास्त्रस्य पदे जुहोति वर्त्मनि जुहोतीत्यादिना विशेषशास्त्रेण बाधः। जामि वा एतद्यज्ञस्यक्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजत्यजामित्वायेति पुरोडाशयोर्मध्ये विहितोप्युपांशुयाजस्तन्मध्यकाल एव विधीयते। तत्र चोपलक्षणापायेप्युपलक्ष्यानपायादसोमयाजिनोग्नीषोमीयपुरोडाशाभावेप्याग्नेयानन्तरमुपांशु योजत्येवभ व॥ ८॥

(इत्यष्टमः पादः।)

इति भाट्टभाषाप्रकाशे दशमोऽध्यायः ॥ १० ॥

समाप्तोऽतिदेशः। एवमुपदेशातिदेशाभ्यां प्राप्तानामङ्गाङ्गिनामियत्तावधारणार्थं तन्त्राध्याय आरभ्यते। तत्र दर्शपूर्णमासयोः षडपि प्रधानानि संहत्य फलं साधयन्ति। तेषां चास्ति सर्वाङ्गोपसंहारापेक्षा। सौर्यादिकाम्यप्रयोगोऽभ्यस्तः फलमधिकं जनयति। तत्र दृष्टार्थानामवघातादीनां यावत्फलोदयमावृत्तिः चयने तूपधेयोलूखलसंस्कारार्थतया प्राप्तः सर्वौषधस्य पूरयित्वाऽवहन्त्यैथतदुपदधातीतिविहितः सर्वौषधावघातो दृष्टार्थत्वाभावात्सकृदेवाऽनुष्ठेयः। एवं प्रयाजादीनप्यदृष्टार्थान् सकृदेवानुतिष्ठेत्। वसन्ताय कपिञ्जलानालभेतेत्यादौ बहुत्वं त्रित्वेनैवोपात्तमित्यधिकसंख्याया अप्राप्तिः। सान्नाय्ये तु तूष्णीमुत्तरा दोहयित्वेत्यत्र यावत्स्वं दोहनं न त्रित्व एव पर्य्यवसानं बहुत्वस्य। नास्यैतां रात्रिं [पयसाऽग्निहोत्रं जुहुयात्] कुमारा न पयोलभेरन्निइतिवचनात्। दर्शादावाग्नेयादिभावना यद्यपि फलं करणं च पृथक् प्रापयन्ति, तासां कथंभावापेक्षायां तु सकृदाम्नातान्येवाङ्गानि सकृदेवोपतिष्ठन्ते। पौर्णमास्यां पौर्णमास्या यजेतेति त्रयाणां युगपदवगतस्या(मप्य)नुष्ठानं पृथक्प्रयोगे बाधापत्तेस्तन्त्रमङ्गानि। एवमप्य ऽऽग्नेयं कृष्णग्रीवमालभेत सौम्यं चरुमाग्नेयं कृष्णग्रीवमित्यत्राग्नेययोः सान्नाय्ये देशकालकर्त्रैक्यादधिपयसोरिव युगपत्प्रदानं न भवति सौम्येन व्यवधानाच्छ्रुतिपाठावगतक्रमबाधाच्च १

(इत्येकादशाध्याये प्रथमः पादः ॥)

देशः समादिः कालो दर्शादिः कर्तारोऽध्वर्य्वादय एतेषां च तन्त्रत्वं न तु प्रतिप्रधानं पृथक्त्वम्। तथापि दर्शत्रिके पौर्णमासत्रिके च कालभेदादग्न्यन्वाधानाद्यङ्गानां पृथक्प्रयोगः। वरु-

णप्रघासेषु विहारद्वयम्, द्वयोरप्याहवनीयो विभज्य स्थापितः। तत्र श्रूयतेष्टौ हवींष्यध्वर्युरुत्तरे विहार आसादयति मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्निसत्र देशभेदात्कर्तृभेदाच्चोभयत्राङ्गानामावृत्तिः। चातुर्मास्येषु पञ्चर्त्विज इतिवचनाद्ब्रह्मादयस्तन्त्रम्। आपराग्निकाः पत्नीसंयाजादयः प्रतिप्रस्थातृकृता [न] मारुत्या उपकुर्वन्तीति तेऽप्यावर्त्तन्ते ॥ २ ॥

(इत्येकादशाध्याये द्वितीयः पादः ॥)

सर्वक्रत्वपेक्षितानामग्नीनां साधकमाधानं सर्वक्रतुषु तन्त्रमेव। आधानागतपवमानेष्टिमारभ्य पात्राणि धार्याणि यावदन्तम्। आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति तेषामन्ते प्रतिपत्तिदर्शनात् ॥ ३ ॥

(इत्येकादशाध्याये तृतीयः पादः ॥)

वाजपेये आग्नावैष्णवमेकादशकपालं निर्वपेद्वामनो[१] दक्षिणा सौमापौष्णं चरुं निर्वपति श्यामो दक्षिणेत्यादौ दक्षिणाभेदात्कर्तृभेदस्ततश्च प्रयोगभेदः। अन्यथा एकया दक्षिणया ऽऽनतानां पुनर्दक्षिणाम्नानवैयर्थ्यापत्तेः। अश्वप्रतिग्रहेष्ट्यर्थेष्वनेकेष्वपि पुरोडाशेषु प्रतिपुरोडाशं पृथक्कपालानि। अत्र रक्षो दिवः सपत्नं वध्यासमिति मन्त्रस्तु न प्रत्यवघातम्। तन्त्रेणैव प्रयोगे तन्नियमफलसिद्धेः। कृष्णविषाणया कण्डूयत इत्युक्तम्। तत्र मन्त्रः कृष्ये त्वा सुसस्याया इति मन्त्रो युगपदनेकेष्वपि कण्डूयनेषु तन्त्रमेव ॥ ४ ॥

(इति चतुर्थः पादः ॥)

इति भाट्टभाषाप्रकाश एकादशोऽध्यायः ॥११॥

पशावैष्टिको विध्यन्तः वितते च पशुतन्त्रे मध्ये पशुपुरोडाशश्चोद्यते अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडा-

---

(१) अत्र क० पु० वद्धो इत्यधिकम्, ख पु० वही इति।

शं निर्वपतीति । समानविध्यन्ते पशौ पतितः पुरोडाशस्तदीयान्येवाङ्गान्युपजीवति न पुनः स्वार्थं पृथगङ्गान्यनुष्ठापयति । सोयमन्यार्थानुष्ठिताङ्गस्यान्येनोपजीवनं प्रसङ्ग इत्युच्यते । तत्रापि यत्पशावाज्यभागावघातादिकमङ्गं नास्ति तादृशे ऽकृतार्थत्वात्प्रयोगवचनस्तान्याक्षिपत्येव पशुपुरोडाशे ॥१॥

(इति द्वादशाध्याये प्रथमः पादः ॥)

विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वम् । अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं दधि मधु घृतमापो धानास्तत्संसृष्टं प्राजापत्यं पशुकाम इत्यत्र सप्त हवींषि । तत्र पञ्च प्राजापत्यानि । तेषु दध्यैन्द्रयोर्दर्शविकारत्वाद् वृधन्वतीमावास्यायामिति वृधन्वदपेक्षा । मधूदकयोराज्यविकारत्वमष्टमे सिद्धम् । अतो मधुघृतायाम् उपांशुयाजविकारत्वेन वार्त्रघ्नौ पौर्णमास्यामिति वार्त्रघ्नापेक्षा । इतराणि तूभयसाधारणानि । आग्नेयविकारत्वात् । तेषु भूयोनुग्रहन्यायाद्दार्शिकमेव तन्त्रम् । मुख्यं चापूर्वचोदनाल्लोकवत् । आग्नावैष्णवमेकादशकपालं निर्वपेदपराह्णे सरस्वतीप्राजस्य यजेतेति अध्वरकल्पे श्रुतम् । तत्राद्यं हविरैन्द्राग्नविकारत्वाद्दार्शिकं तन्त्रमपेक्षते द्वितीयमुपांशुयाजविकारत्वात्पौर्णमासम् । तत्र मुख्यानुरोधाद्दार्शिकमेव तन्त्रमुपजीव्यम् । आग्रयणेष्ट्यामैन्द्राग्नवैश्वदेवद्यावापृथिव्यानि हवींषि । तत्र द्यावापृथिव्यस्य वैश्वदेवकपालविकारत्वादस्ति प्रस्तूनबर्हिरपेक्षा । इतरेषां तु तत्रोदासीनत्वान्नास्ति प्रस्तूने आग्रहः । अतः कांस्यभोजिन्यायेनाग्रयणे प्रस्तूनमेव बर्हिः कांस्ये भोक्तव्यं गुरूच्छिष्टं च भोक्तव्यमिति शिष्यनियमादुदासीनस्यापि गुरोः कांस्यभोजनमावश्यकम् । तद्वदेतद् द्रष्टव्यम् ॥२॥

(इति द्वादशाध्याये द्वितीयः पादः ॥)

एकार्थास्तु विकल्पेरन् यथा व्रीहियवादयः । नानध्यायोस्ति मन्त्राणां कर्मार्थत्वेन पर्वसु ॥ मन्त्राणां करणत्वेन तदन्ते कर्मणः क्रिया ॥३॥

(इति द्वादशाध्याये तृतीयः पादः ॥)

ब्राह्मणानामार्त्विज्यमिति कल्पकारवचनात् क्षत्रियो याजको यस्य चण्डालस्य विशेषत इति रामायणे निन्दास्मरणात् चतुर्द्धाकरणमन्त्रेषु ब्राह्मणानामिदं हविरिति मन्त्रलिङ्गाच्च ब्राह्मणानामेवार्त्विज्यम् ॥ ४ ॥

(इति चतुर्थः पादः ॥)

(इति द्वादशोऽध्यायः ॥)

भगवच्छिवरामतीर्थशिष्यो मुनिनारायणतीर्थनामधेयः ।
व्य(अ)तनोदधिकाशि भाट्टभाषाग्रथनं भाट्टनयप्रवेशहेतोः ॥
इति श्रीपरमहंसपरिव्राजकाचार्यभगवच्छिवरामतीर्थपूज्यपादशिष्यश्रीनारायणतीर्थमुनिविरचितो भाट्टभाषाप्रकाशोऽयं समाप्तिमगमत् ॥

हरिः ॐ तत्सत् ॥

(१) प्रकाशिकेयमिति पाठान्तरम् ॥